सर्व आभूषणों से सुसज्ज, लक्ष्मी के समान दीर्घ लोचन वाली, मुट्ठी भर कमर वाली, पाँच चिकने अंगों वाली, शुभवदन वाली, स्त्रियों से घिरी हुई दिव्या सती 'श्रीमती' वहाँ पधारीं ॥ ३५ ॥

राजा की वह समृद्ध सभा अनेक मणिरत्नों से शोभायमान थी। वह (हाथ में) सुगंधी माला धारण किये हुए (उस राजसभा में) आसन पर बैठी हुई थी। (वहाँ उपस्थित) देवराज के समान श्रेष्ठ सब (राजा लोग) उसका अनुसरण करने लगे ॥ ३६ ॥

उस समय ब्रह्मवरात्मज, महान् त्रिविद्यावृद्ध, ब्रह्मविदों में श्रेष्ठ, भगवान् महात्मा महामुनि नारद पर्वत के साथ (वहाँ पधारे) ॥ ३७ ॥

॥ इति श्री वाल्मीकिविरचित आदिकाव्य रामायण के अद्भुतोत्तर-
काण्ड में 'राजसभा में नारद तथा पर्वत का आगमन' नाम
तृतीय सर्ग समाप्त ॥ ३ ॥

चतुर्थ सर्ग

रामचन्द्र के जन्म-धारण का कारण

उन दोनों को आये हुए देखकर राजा का चित्त संभ्रान्त हो गया। (राजा ने) उन्हें दिव्य आसन देकर उन दोनों की पूजा की ॥ १ ॥

वे दोनों देवर्षि दिव्य थे और ज्ञानियों में श्रेष्ठ थे। दोनों मुनिवर्य कन्या के कारण (आसन पर) बैठे ॥ २ ॥

उन दोनों को प्रथम प्रणाम करके राजा (अपनी) कमलदल के समान लोचन वाली, शुभा, यशस्विनी कन्या 'श्रीमती' से कहने लगे— ॥३॥

अनयोर्यं वरं भद्रे ! मनसा त्वमिहेच्छसि ।
तस्मै मालामिमां देहि प्रणिपत्य यथाविधि ॥ ४ ॥
एवमुक्ता तु सा कन्या स्त्रीभिः परिवृता तदा ।
मालां हिरण्मयीं दिव्यामादाय शुभलोचना ॥ ५ ॥
तस्थौ तामाह राजासौ वत्से किं त्वं करिष्यसि ॥ ६ ॥
अनयोरेकमुद्दिश्य देहि मालामिमां शुभे ।
सा प्राह पितरं त्रस्ता इमौ तु वानराननौ ॥ ७ ॥
मुनिश्रेष्ठौ न पश्यामि नारदं पर्वतं तथा ।
अनयोर्मध्यतस्त्वेकं वरं षोडशवार्षिकम् ॥ ८ ॥
सर्वाभरणसंयुक्तमतसीपुष्पसंनिभम् ।
दीर्घबाहुं विशालाक्षं तुंगोरःस्थलमुत्तमम् ॥ ९ ॥
चामीकरान्धकरणंपटयुग्मकशोभितम् ।
विभक्तत्रिवलीयुक्तनाभिं व्यक्तकृशोदरम् ॥ १० ॥
हिरण्याभरणोपेतं सुरंगकनखं शुभम् ।
पद्माकारकरं त्वेनं पद्मास्यं पद्मलोचनम् ॥ ११ ॥
पद्मांघ्रि पद्महृदयं पद्मनाभं श्रियावृतम् ।
दंतपंक्तिभिरत्यर्थं कुन्दकुड्मलसन्निभम् ॥ १२ ॥
हसन्तं मां समालोक्य दक्षिणं च प्रसार्य वै ।
पाणिं स्थितमिमं छन्नं पश्यामि शुभमूर्धजम् ॥ १३ ॥
एवमुक्ते मुनिः प्राहः नारदः संशयं गतः ।
कियंतो बाहवस्तस्य कन्ये वद यथातथम् ॥ १४ ॥
बाहुद्वयं च पश्यामीत्याह कन्या सुविस्मिता ।
प्राह तां पर्वतस्तत्र तस्य वक्षःस्थले शुभे ॥ १५ ॥
किंच पश्यसि मे ब्रूहि करे किं धारयत्यपि ।
कन्या तमाह मालां वै चंचद्रूपामनुत्तमाम् ॥ १६ ॥
वक्षःस्थलेऽस्य पश्यामि करे कार्मुकसायकौ ।
एवमुक्तौ मुनिश्रेष्ठौ परस्परमनुत्तमौ ॥ १७ ॥
मनसा चिंतयंतौ तौ मायेयं कस्यचिद्भवेत् ।
मायावी तस्करो नूनं स्वयमेव जनार्दनः ॥ १८ ॥

"हे भद्रे ! इन दोनों में से जिस वर की तुम मन से इच्छा करती हो, उसी को यथाविधि प्रणाम करके यह (वर) माला पहनाओ" ॥ ४ ॥

इस प्रकार के वचन जिसे कहे गये उस कन्या को उस समय स्त्रियों ने घेर लिया। तब वह शुभलोचना दिव्य सुवर्ण की माला लेकर खड़ी हुई। राजा ने उसे कहा— "हे वत्से ! तू क्या करेगी ?" ॥ ५-६ ॥

"हे शुभे ! इन दोनों में से एक को तू (वर) माला अर्पण कर।" (तब) वह त्रस्त होकर बोली— "ये दोनों तो बंदर के मुख वाले हैं" ॥ ७ ॥

"मैं मुनिश्रेष्ठ नारद तथा पर्वत को नहीं देख पाती हूँ। किन्तु इन दोनों के बीच एक सोलह वर्ष के वर को देख रही हूँ, जो (अलसी के पुष्प के समान) सारे आभूषणों से युक्त (है, जिसके) बाहु दीर्घ हैं, जो विशाल और उभरे हुए वक्षःस्थल वाले, ऊँचे और पुष्ट उरःस्थल वाले, सुवर्ण के समान कान्ति वाले दो वस्त्रों से सुशोभित, विभक्त त्रिवली से युक्त नाभि वाले, स्पष्ट रूप से कृश उदर वाले, सुवर्णालंकारों से सुशोभित सुन्दर रंगीन नख वाले, कमल के समान हाथ वाले, कमल-वदन, कमलनयन, कमल के-से चरण वाले, कमलहृदय, पद्मनाभ, शोभासंपन्न, कुन्द पुष्प की कली के समान दंतपंक्ति से अतिशय रमणीय दिख रहे हैं" ॥ ८-१२ ॥

"मुझे देखकर हँसते हुए, दाहिने हाथ को फैलाकर खड़े हुए, सुंदर बाल वाले छिपे हुए (वर) को मैं देख रही हूँ" ॥ १३ ॥

इस प्रकार कन्या के द्वारा निवेदन किये जाने पर द्विधाग्रस्त (होकर) नारद मुनि बोले— "हे कन्या ! सच बताओ, उसकी भुजाएँ कितनी हैं ?" ॥ १४ ॥

अत्यन्त विस्मित होकर कन्या बोली— "मैं दो भुजाएँ देखती हूँ।" तब पर्वत ने उससे पूछा— "हे शुभे ! (उसके) वक्षःस्थल पर तुम क्या देख रही हो ? उसने अपने हाथ में क्या धारण किया है ? मुझे बताओ।" कन्या बोली— "(मैं) उसके वक्षःस्थल पर चमकती हुई सर्वश्रेष्ठ माला देख रही हूँ (तथा उसके), हाथ में धनुष और बाण हैं।" जब ऐसा वर्णन किया गया, तब वे दोनों मुनिश्रेष्ठ मन ही मन सोचने लगे, "यह किसी की माया होगी। यह मायावी चोर अवश्य श्रीकृष्ण स्वयं ही होंगे" ॥ १५-१८ ॥

आगतो नान्यथा कुर्यात्कथं मेऽन्यो मुखं त्विदम् ।
गोलांगूलीयमित्येवं चिंतयामास नारदः ॥ १९ ॥
पर्वतोऽपि तथैवैतद्वानरत्वं कथं मया ।
प्राप्तमित्येव सहसा चिंतामापेदिवांस्तथा ॥ २० ॥
ततो राजा प्रणम्यासौ नारदं पर्वतं तथा ।
भवद्भ्यां किमिदं भद्रौ कृतं बुद्धिविमोहनम् ॥ २१ ॥
स्वस्थौ भवंतौ तिष्ठेतां यदि कन्यार्थमुद्यतौ ।
एवमुक्तौ मुनिश्रेष्ठौ नृपमूचतुरुल्बणौ ॥ २२ ॥
त्वमेव मोहं कुरुषे नावामिह कथंचन ।
आवयोरेकमेषा ते वरयत्वेव भामिनी ॥ २३ ॥
ततः सा कन्यका भूयः प्रणिपत्य च देवताम् ।
पित्रा नियुक्ता सहसा मुनिशापभयाद् द्विज ॥ २४ ॥
मालामादाय तिष्ठन्ती तयोर्मध्ये समाहिता ।
पूर्ववत्पुरुषं दृष्ट्वा माल्यं तस्मै ददौ हि सा ॥ २५ ॥
अनंतरं च सा कन्या दृष्टा न मनुजैः पुरः ।
ततो नादः समभवत्किमेतदिति विस्मयात् ॥ २६ ॥
तामादाय गतो विष्णुः स्वस्थानं पुरुषोत्तमः ।
पुरा तदर्थमनिशं तपस्तप्त्वा वरांगना ॥ २७ ॥
श्रीमतीयं समुत्पन्ना सा गता च तथा हरिम् ।
तावुभौ मुनिशार्दूलौ धिक्त्वामित्येव दुःखितौ ॥ २८ ॥
वासुदेवं प्रति तदा जग्मतुर्भवनं हरेः ।
तावागतौ समीक्ष्याह श्रीमतीं भगवान्हरिः ॥ २९ ॥
मुनिश्रेष्ठौ समायातौ गूढस्वात्मानमत्र वै ।
तथेत्युक्ता च सा देवी प्रहसंती चकार ह ॥ ३० ॥
नारदः प्रणिपत्याग्रे प्राह दामोदरं हरिम् ।
किमिदं कृतवानद्य मम त्वं पर्वतस्य च ॥ ३१ ॥
त्वमेव नूनं गोविंद कन्यां तां हृतवानसि ।
तच्छ्रुत्वा पुरुषो विष्णुः पिधाय श्रोत्रमच्युतः ॥ ३२ ॥
पाणिभ्यां प्राह भगवन्भवता किमुदीरितम् ।
कामवादो न भावोऽयं मुनिवृत्तेरहो किल ॥ ३३ ॥

नारदजी सोचने लगे— "वही आये हुए हैं ! अन्यथा, दूसरा कोई मेरे मुख को बंदर-सा कैसे बना सकता है ?" ॥ १९ ॥

पर्वत भी उसी प्रकार चिन्ता करने लगे कि "सहसा मुझे वानरत्व कैसे प्राप्त हो गया ?" ॥ २० ॥

तब वह राजा प्रणाम करके नारद और पर्वत से बोला— "हे भद्र ! आप दोनों की बुद्धि में यह मोह कैसे उदित हो गया ? ॥ २१ ॥

यदि कन्या (को वरण करने) के लिए आप उत्सुक हैं, तो आप दोनों समस्थ खड़े रहिए।" यह सुनकर दोनों मुनिश्रेष्ठ राजा से कहने लगे— ॥ २२ ॥

"तुम्हीं ने मोह किया है। हम दोनों ने यहाँ किसी प्रकार का मोह नहीं किया है। यह तेरी कन्या हम दोनों में से (किसी) एक को वरण करे" ॥ २३ ॥

तब शाप के डर से वह कन्या पिता द्वारा नियुक्त की गई देवता को प्रणाम करके हे द्विज ! सहसा माला लेकर दोनों के बीच सावधान होकर खड़ी रही (और) पहले के समान पुनः उसी पुरुष को देखकर उसी के गले में उसने वरमाला अर्पण कर दी ॥ २४-२५ ॥

बाद में मनुष्यों ने उस कन्या को वहाँ न देखा, तब (वहाँ) आश्चर्य से 'यह क्या है', —'यह क्या हो गया' —ऐसा शोर मच गया ॥ २६ ॥

उसे लेकर पुरुषोत्तम विष्णु अपने स्थान में गये। प्राचीन काल में उस भगवान की कृपाप्राप्ति के कारण अहर्निश तप करने से इस सुन्दर स्त्री 'श्रीमती' का जन्म हुआ था और इस प्रकार अब वह हरि के पास गई। वे दोनों मुनिश्रेष्ठ परस्पर वार्त्तालाप करते हुए कहने लगे कि 'तुमको धिक्कार हो' और वे अत्यन्त दुःखी हुए ॥ २७-२८ ॥

तब फिर से वे दोनों वासुदेव के भवन को गये। उन दोनों को आये हुए देखकर भगवान विष्णु ने 'श्रीमती' से कहा— ॥ २९ ॥

"दोनों मुनिवर्य आ रहे हैं। तू अपने-आप को छिपा ले।" "अच्छा" कहकर हँसती हुई उस देवी ने वैसा किया ॥ ३० ॥

पहले नारदजी ने प्रणाम करके दामोदर विष्णु से कहा— "आपने आज मेरी और पर्वत की यह क्या दुर्दशा कर दी ?" ॥ ३१ ॥

"हे गोविंद ! आप ही ने अवश्य उस कन्या का हरण किया है।" यह सुनकर पुरुषोत्तम अच्युत विष्णु अपने दोनों कानों पर दोनों हाथ रखते हुए बोले— "हे भगवान ! आप यह कसी बात कह रहे हैं ? यह क्या आपका कामवाद नहीं है ? क्या यही आपकी मुनिवृत्ति है ?" ॥३२-३३॥

एवमुक्तो मुनिः प्राह वासुदेवं स नारदः ।
कर्णमूले मम कथं गोलांगूलमुखं त्विति ॥ ३४ ॥

तदाकर्ण्य महाबुद्धिर्देवो नारायणो हरिः ।
कर्णमूले तमाहेदं वानरास्यं कृतं मया ॥ ३५ ॥

पर्वतस्य तथा विप्र गोलांगूलमुखम् तव ।
यथा भवांस्तथा सोऽपि प्रार्थयामास निर्जने ॥ ३६ ॥

मामेव भक्तिवशगस्तथास्म्यकरवं मुने ।
न स्वेच्छया कृतं तद्वां प्रियार्थं नान्यथात्विति ॥ ३७ ॥

याचते यच्च यश्चैव तच्च तस्य ददाम्यहम् ।
न दोषोऽत्र गुणो वापि युवयोर्मम वा द्विज ॥ ३८ ॥

पर्वतोऽपि तथा प्राह तस्याप्येवं जगाद सः ।
शृण्वतोरुभयोस्तत्र प्राह दामोदरो वचः ॥ ३९ ॥

प्रियं भवतोः कृतवान्सत्येनायुधमालभे ।
नारदः प्राह धर्मात्मा आवयोर्मध्यतः स्थितः ॥ ४० ॥

धनुष्मान्द्विभुजः को नु तां हृत्वा गतवान्किल ।
तच्छ्रुत्वा वासुदेवोऽसौ प्राह तौ मुनिसत्तमौ ॥ ४१ ॥

मायाविनौ महात्मानौ ! बहवः सन्ति सत्तमौ ! ।
तत्र सा श्रीमती देवी हृता केनापि सुव्रतौ ॥ ४२ ॥

चक्रपाणिरहं नित्यं चतुर्बाहुरिति स्थितिः ।
तस्मान्नाहमतथ्यो वै भवद्भ्यां विदितं हि तत् ॥ ४३ ॥

इत्युक्तौ प्रणिपत्यैनमूचतुः प्रीतमानसौ ।
कोऽत्र दोषस्तव विभो नारायण जगत्पते ! ॥ ४४ ॥

दौरात्म्यं तु नृपस्यैव मायां हि कृतवानसौ ।
इत्युक्त्वा जग्मतुस्तस्मान्मुनी नारदपर्वतौ ॥ ४५ ॥

अंबरीषं समासाद्य शापेनैनमयोजयत् ।
नारदः पर्वतश्चैव यस्मादावामिहागतौ ॥ ४६ ॥

आहूय पश्चादन्यस्मै कन्यां त्वं दत्तवानसि ।
मायायोगेन तस्मात्त्वां तमोऽज्ञाभिभविष्यति ॥ ४७ ॥

यह वचन सुन नारदजी ने धीरे से वासुदेव से कान में पूछा— "मेरा गोलांगूल-मुख कैसे हो गया ?" ॥ ३४ ॥

यह सुनकर अतिशय बुद्धिमान् भगवान नारायण ने उनसे कान में कहा— "मैंने ही तुम्हें वानर-मुख कर दिया था ॥ ३५ ॥

"हे विप्र ! तुम्हारे (ही) समान पर्वत का भी गोलांगूल मुख (मैंने ही कर दिया था), क्योंकि तुम्हारी तरह उन्होंने भी एकान्त में मुझसे (वैसी ही) प्रार्थना की थी ॥ ३६ ॥

हे मुने ! (तुम दोनों की) भक्ति के वश होने के कारण मैंने वैसा किया, अपनी इच्छा से नहीं किया । तुम दोनों की प्रीति के कारण किया, अन्यथा नहीं ॥ ३७ ॥

जो व्यक्ति जो कुछ माँगता है, उसे मैं वह देता हूँ । हे द्विज ! इसमें मेरा या तुम दोनों का कोई गुण या दोष नहीं है" ॥ ३८ ॥

पर्वत ने भी वैसा ही पूछा और कहा । भगवान ने भी उसे वही उत्तर दिया । वे दोनों जब सुन रहे थे, तब दामोदर ने ये वचन कहे—॥ ३९ ॥

"मैं आयुध की सौगन्द खाकर सचसच कहता हूँ, मैंने आप दोनों का प्रिय किया है ।" (तब) धर्मात्मा नारदजी बोले, "हम दोनों के बीच में स्थित ॥ ४० ॥

दो भुजा वाला (वह) धनुषधारी कौन था जो उस (कन्या) को हरण करके ले गया ?" यह सुनकर वासुदेव उन दो मुनिश्रेष्ठों से (इस प्रकार) कहने लगे— ॥ ४१ ॥

हे समर्थ सत्तम महात्माओ ! (इस) संसार में बहुत-से माया (का जाल फैलाने) वाले (लोग) हैं । हे सुव्रत ! उनमें से किसी ने श्रीमती का हरण किया होगा ॥ ४२ ॥

मैं तो सर्वदा चक्रपाणि और चार भुजा वाला हूँ । यह स्थिति है । अतः मैं झूठ नहीं कहता, यह आपको तो विदित है (ही) ॥ ४३ ॥

इस प्रकार कहने पर उन दोनों ने प्रणाम करके प्रसन्न मन से उनसे कहा— "हे विभु ! नारायण ! जगत्पति ! इसमें आपका क्या दोष है ?" ॥४४॥

"यह तो राजा की ही दुर्जनता है । उसने अवश्य माया की है" —ऐसा कहकर नारद और पर्वत दोनों मुनि वहाँ से चले गये ॥ ४५ ॥

(वहाँ से सीधे वे दोनों राजा अम्बरीष के पास गये ।) उन्होंने अम्बरीष के पास जाकर उसे शाप दिया । (वे बोले—) "हम दोनों— नारद और पर्वत यहाँ (तुम्हारे पास) आये थे ॥ ४६ ॥

किन्तु बाद में (कपटपूर्वक) तुमने मायायोग से दूसरे (किसी) को बुलाकर उसे (अपनी) कन्या प्रदान कर दी । अतः तुम घोर अन्धकार-रूप अज्ञान के वश में आ जाओगे ॥ ४७ ॥

तेन नारायणमत्यर्थं यथावत्त्वं हि वेत्स्यसि ।
एवं शापे प्रवृत्ते तु तमोराशिरथोत्थितः ॥ ४८ ॥

नृपं प्रति ततश्चक्रं विष्णोः प्रादुरभूत्क्षणात् ।
चक्रविभासितं घोरं तावुभावभ्यगात्तमः ॥ ४९ ॥

ततः संत्रस्तसर्वांगौ धावमानौ महामुनी ।
पृष्ठतश्चक्रमालोक्य तमोराशिं च दुर्मदम् ॥ ५० ॥

कन्यासिद्धिरहो प्राप्ता आवयोरिति वेगितौ ।
लोकालोकांतमनिशं धावमानौ तमोऽर्दितौ ॥ ५१ ॥

त्राहि त्राहीति गोविंद भाषमाणौ भयार्दितौ ।
विष्णुलोकं ततो गत्वा नारायण जगत्पते ॥ ५२ ॥

वासुदेव हृषीकेश पद्मनाभ जनार्दन ।
त्राह्यावां पुण्डरीकाक्ष नाथोऽसि पुरुषोत्तम ॥ ५३ ॥

इत्यूचतुर्वासुदेवं मुनी नारदपर्वतौ ।
ततो नारायणोऽचिंत्यः श्रीमाञ्छ्रीवत्सलांछनः ॥ ५४ ॥

निवार्यं चक्रं ध्वांतं च भक्तानुग्रहकाम्यया ।
अंबरीषश्च मद्भक्तस्तथेमौ मुनिसत्तमौ ॥ ५५ ॥

अनयोर्नृपस्य च तथा हितं कार्यं मया पुनः ।
आहूय तौ ततः श्रीमान्गिरा प्रह्लादयन्हरिः ॥ ५६ ॥

उवाच भगवान्विष्णुः श्रूयतामिति मे वचः ।
क्षमेतां मुनिशार्दूलौ भक्तसंरक्षणाय मे ॥ ५७ ॥

अपराद्धं च चक्रेण क्षमाशीला हि साधवः ।
ततस्तौ मुनिशार्दूलौ मायां तस्यावबुध्य च ॥ ५८ ॥

ददतुश्च ततः शापं विष्णुमुद्दिश्य कोपनौ ।
श्रीमतीहरणं विष्णो यत्कृतं छद्मना त्वया ॥ ५९ ॥

यया मूर्त्या तथैव त्वं जायेथा मधुसूदन ।
अम्बरीषस्यान्ववाये राज्ञो दशरथस्य हि ॥ ६० ॥

इससे तुम अपनी आत्मा को यथार्थ रूप में नहीं जान सकोगे।" इस प्रकार शाप के प्रवृत्त होने पर घोर तमोराशि का आविर्भाव हो गया ॥ ४८ ॥

तब क्षण मात्र में राजा की ओर विष्णु का चक्र प्रगट (होकर गतिमान) हुआ। चक्र से वित्रासित होकर तब वह घोर अंधकार उन दोनों की ओर बढ़ा ॥ ४९ ॥

तब वे दोनों महामुनि (उससे व्यथित और त्रस्त होने से) सारे अंगों से व्याकुल (होकर) दौड़ने लगे। (अपने पीछे-) पीछे चक्र को तथा उस दुर्मद तमोराशि को देखकर (बोले—) ॥ ५० ॥

"अहो! (क्या) हमें कन्या की यह सिद्धि प्राप्त हुई है?" (इस प्रकार बोलकर वे दोनों) लोकालोक पर्वत की ओर निरन्तर वेगपूर्वक दौड़ते हुए, अंधकार से पीड़ित होकर (चिल्लाने लगे—) ॥ ५१ ॥

"हे गोविन्द! बचाओ, बचाओ!" इस प्रकार बोलते हुए भय से (ग्रस्त और) व्यथित (वे) दोनों विष्णुलोक में जाकर (इस प्रकार प्रार्थना करने लगे—) "हे नारायण! (हे) जगत्पते! ॥ ५२ ॥

वासुदेव, हृषीकेश, पद्मनाभ, जनार्दन, पुण्डरीकाक्ष! हम दोनों की रक्षा कीजिए! हे पुरुषोत्तम! आप हमारे स्वामी हैं" ॥ ५३ ॥

इस प्रकार नारद और पर्वत दोनों मुनि वासुदेव से प्रार्थना करने लगे। तब अचिन्त्य श्रीमान् श्रीवत्स के चिह्न को धारण करनेवाले नारायण ॥ ५४ ॥

भक्त पर अनुग्रह करने की इच्छा से चक्र तथा अंधकार का निवारण करके (मन में) बोले— "अम्बरीष मेरा भक्त है। उसी प्रकार ये दो मुनिश्रेष्ठ भी मेरे भक्त हैं ॥ ५५ ॥

मुझे तो इन दोनों का तथा राजा का भी हित करना होगा।" तब भगवान विष्णु ने उन दोनों को बुलाकर (अपनी मीठी) वाणी से प्रसन्न करते हुए ॥ ५६ ॥

(इस प्रकार) कहा— "मेरा वचन सुनिए, हे मुनिसत्तमो! भक्त के संरक्षण के लिए मैंने जो कुछ किया है, उसे क्षमा कर दीजिए ॥ ५७ ॥

चक्र ने आपका अपराध किया है, (किन्तु) सज्जन लोग क्षमाशील होते हैं।" तब उन दोनों मुनिश्रेष्ठों ने उनकी माया का भेद पाकर ॥ ५८ ॥

अतिशय क्रोधित होकर विष्णु को शाप दिया— "हे विष्णु! आपने छलपूर्वक श्रीमती का हरण किया है ॥ ५९ ॥

जिस प्रकार (आपने श्रीमती का हरण किया है,) उसी प्रकार हे मधुसूदन! आप अम्बरीष के वंश में उत्पन्न होनेवाले राजा दशरथ के ॥ ६० ॥

पुत्रस्त्वं भविता पुत्री श्रीमती धरणीप्रजा ।
भविष्यति विदेहश्च प्राप्य तां पालयिष्यति ॥ ६१ ॥

राक्षसापदः कश्चित्तां ते भार्यां हरिष्यति ।
यतो राक्षसधर्मेण हृता च श्रीमती शुभा ॥ ६२ ॥

अतस्ते रक्षसा भार्या हर्तव्या छद्मनाऽच्युत ।
यथा प्राप्तं महद्दुःखमावाभ्यां श्रीमतीकृते ॥ ६३ ॥

हाहेति रुदता लभ्यं तथा दुःखं च तत्कृते ।
इत्युक्तवन्तौ तौ विप्रौ प्रोवाच मधुसूदनः ॥ ६४ ॥

अम्बरीषस्यान्ववाये भविष्यति महायशाः ।
श्रीमान्दशरथो नाम भूमिपालोऽतिधार्मिकः ॥ ६५ ॥

तस्याहमग्रजः पुत्रो रामो नाम भवाम्यहम् ।
तत्र मे दक्षिणो बाहुर्भरतो भविता किल ॥ ६६ ॥

शत्रुघ्नो वामबाहुश्च शेषोऽसौ लक्ष्मणः स्वयम् ।
ऋषिशापो न चैव स्यादन्यथा चक्र गम्यताम् ॥ ६७ ॥

ऋषिशापतमोराशे यदा रामो भवाम्यहम् ।
तत्र मां समुपागच्छ गच्छेदानीं नृपं विना ॥ ६८ ॥

त्यक्त्वापि च मुनिश्रेष्ठाविति स्म प्राह माधवः ।
एवमुक्ते तमोनाशं तत्क्षणाच्च जगाम वै ॥ ६९ ॥

आत्मार्थं संचितं तेन प्रभुणा भक्तरक्षिणा ।
निवारितं हरेश्चक्रं यथापूर्वकतिष्ठत ॥ ७० ॥

मुनिश्रेष्ठौ भयान्मुक्तौ प्रणिपत्य जनार्दनम् ।
निर्गतौ शोकसंतप्तावूचतुस्तौ परस्परम् ॥ ७१ ॥

अद्यप्रभृति देहांतमावां कन्यापरिग्रहम् ।
न करिष्याव इत्युक्त्वा प्रतिज्ञाय च तावृषी ॥ ७२ ॥

मौनध्यानपरौ शुद्धौ यथापूर्वं व्यवस्थितौ ।
अम्बरीषोऽपि राजासौ परिपाल्य च मेदिनीम् ॥ ७३ ॥

सभृत्यज्ञातिसंबंधो विष्णुलोकं जगाम वै ।
मानार्थमंबरीषस्य तथैव मुनिसिंहयोः ॥ ७४ ॥

पुत्र बनेंगे और श्रीमती धरती की पुत्री होगी, एवं (राजा जनक) विदेह (उसको) प्राप्त करके उसका पालन करेंगे ॥ ६१ ॥

कोई नीच राक्षस आपकी उस भार्या का हरण करेगा, क्योंकि आपने शुभलक्षणा श्रीमती का राक्षस-धर्म से हरण किया है ॥ ६२ ॥

इसलिए हे अच्युत ! आपकी भार्या का राक्षस द्वारा छल से हरण होगा। जिस प्रकार हम दोनों ने श्रीमती के (वियोग) के कारण असह्य दुःख प्राप्त किया है, ॥ ६३ ॥

उसी प्रकार उस भार्या के (वियोग) के कारण 'हा-हा'—ऐसा रुदन करनेवाले आपको दुःख प्राप्त होगा।" इस प्रकार बोलनेवाले उन दोनों विप्रों को मधुसूदन् ने कहा— ॥ ६४ ॥

"अम्बरीष के वंश में महान यशस्वी श्रीमान् 'दशरथ' नाम के एक अति धार्मिक राजा होंगे ॥ ६५ ॥

मैं उनका ज्येष्ठ पुत्र 'राम' नाम से (अवतार लेकर) होऊँगा। यहाँ मेरी दाहिनी भुजा (के समान भाई) भरत होंगे ॥ ६६ ॥

बायीं भुजा शत्रुघ्न तथा शेष स्वयं लक्ष्मण होंगे और ऋषि का (दिया) शाप भी अन्यथा नहीं होगा। चक्र ! (अब तुम) जाओ ॥ ६७॥

जिस समय ऋषि-शाप रूपी तमोराशि से मैं राम बनूंगा, उस समय मेरे पास आना। अब बिना राजा के जाओ ॥ ६८ ॥

तथा दोनों मुनिवर्यों को भी (छोड़ के जाओ)।" इस प्रकार माधव बोले। उनके द्वारा ऐसा कहे जाने पर तत्क्षण ही तम का नाश हो गया ॥ ६९ ॥

भक्त की रक्षा करनेवाले प्रभु ने अपने लिए उसको संचित किया। निवारित किया हुआ विष्णु का चक्र (तब) पूर्ववत् स्थित हो गया ॥७०॥

भय से मुक्त हुए दोनों मुनिश्रेष्ठ जनार्दन को प्रणाम करके शोक से संतप्त हो (कर) चले गये और परस्पर वार्त्तालाप करने लगे— ॥ ७१ ॥

(अब) हम दोनों आज से लेकर मृत्युपर्यंत कन्या का परिग्रह नहीं करेंगे (आजीवन ब्रह्मचारी रहेंगे)। इस प्रकार बोल के उन दोनों ऋषियों ने (आजीवन ब्रह्मचर्यपालन की) प्रतिज्ञा की और ॥ ७२ ॥

मौनपूर्वक ध्यान में मग्न होकर (उन्होंने अपना अंतःकरण शुद्ध किया।) तथा शुद्ध होने पर पूर्ववत् (अपने आत्मस्वरूप में) स्थित हो गये। वे राजा अम्बरीष भी पृथ्वी का पालन करके ॥ ७३ ॥

सेवक, ज्ञातिजन एवं संबंधियों-सहित विष्णुलोक को (चले) गये। अम्बरीष एवं दोनों मुनिश्रेष्ठों के सम्मान के लिए ॥ ७४ ॥

रामो दाशरथिर्भूत्वा तमसा लुप्तबुद्धिकः ।
कदाचित्कार्यवशतः स्मृतिः स्यादात्मनः प्रभोः ॥ ७५ ॥

पूर्णार्थोऽपि महाबाहुरपूर्णार्थ इव प्रभुः ।
अनुग्रहाय भक्तानां प्रभूणामीदृशी गतिः ॥ ७६ ॥

मायां कृत्वा महेशस्य प्रोत्थिता मानुषी तनुः ।
तस्मान्माया न कर्तव्या विद्वद्भिर्दोषदर्शिभिः ॥ ७७ ॥

एतत्ते कथितं सर्वं रामजन्मकथाश्रयम् ।
अंबरीषस्य माहात्म्यं मायावित्त्वं च वै हरेः ॥ ७८ ॥

यः पठेच्छृणुयाद्वापि मायावित्वं हरेर्विभोः ।
मायां विसृज्य पुण्यात्मा विष्णुलोकं स गच्छति ॥ ७९ ॥

दशरथसुतजन्मकारणं यः पठति शृणोत्यनुमोदते द्विजेन्द्रः ।
व्रजति स भगवद्गृहातिथित्वं नहि शमनस्य भयं कुतश्चिदस्य ॥ ८० ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकाण्डे श्रीरामजन्मोपक्रमश्चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः

भरद्वाज शृणुष्वाथ सीताजन्मनि कारणम् ।
पुरा त्रेतायुगे कश्चित्कौशिको नाम वै द्विजः ॥ १ ॥

वासुदेवपरो नित्यं नामगानरतः सदा ।
भोजनाशनशय्यासु सदा तद्गतमानसः ।
उदारचरितं विष्णोर्गायमानः पुनःपुनः ॥ २ ॥

विष्णुस्थलं समासाद्य हरेः क्षेत्रमनुत्तमम् ।
अगायत हरिं तत्र तालवल्गुलयान्वितम् ॥ ३ ॥

मूर्च्छनामूर्च्छनायोगेन श्रुतिमंडलवेदितम् ।
भक्तियोगसमापन्नो भिक्षामश्नाति तत्र वै ॥ ४ ॥

तत्रैनं गायमानं च दृष्ट्वा कश्चिद् द्विजस्तदा ।
पद्माक्ष इति विख्यातस्तस्मै चान्नं ददौ सदा ॥ ५ ॥

विष्णु ने दशरथ के तमोगुण से लुप्त बुद्धि वाले पुत्र राम के रूप में अवतार लिया। क्वचित् कार्यवशात् प्रभु को अपनी स्मृति हो आती थी ॥ ७५ ॥

वे महाबाहु पूर्ण अर्थ वाले होकर भी अपूर्ण अर्थ वाले के समान (दीखते थे) भक्तों पर अनुग्रह करने के लिए स्वामियों की ऐसी स्थिति होती है (यह देखने में आता है) ॥ ७६ ॥

वे महेश की माया के आश्रित होकर मानव-शरीर को प्राप्त हुए। अतः दोष को जाननेवाले विद्वानों को माया नहीं करनी चाहिए ॥ ७७ ॥

तुमको रामजन्म का यह पूरा आशय, अम्बरीष का माहात्म्य तथा विष्णु का माया से युक्त होना बता दिया गया ॥ ७८ ॥

भगवान विष्णु द्वारा लिये गये माया के आश्रय की कथा जो कोई भी पढ़ता है अथवा श्रवण करता है, वह पुण्यात्मा माया को छोड़कर विष्णुलोक को प्राप्त करता है ॥ ७९ ॥

जो द्विजेन्द्र दशरथ के पुत्र के जन्म के कारण की कथा पढ़ता है, श्रवण करता है तथा (उसका) अनुमोदन करता है, वह भगवान के घर का अतिथि होता है। उसको किसी भी निमित्तरूप से यम का डर नहीं सताता ॥ ८० ॥

॥ इति श्रीवाल्मीकिविरचित आदिकाव्य रामायण के अद्भुतोत्तर-काण्ड में 'श्रीराम के जन्म धारण करने का कारण' नाम चतुर्थ अध्याय समाप्त ॥ ४ ॥

पञ्चम सर्ग

जानकी-जन्म का कारण

हे भरद्वाज ! अब सीता के जन्म का कारण सुनो। प्राचीन समय में त्रेतायुग में 'कौशिक' नाम का कोई एक ब्राह्मण (था) ॥ १ ॥

(वह) वासुदेवपरायण और सदा उनके नाम-संकीर्तन में रत रहता था। वह नित्य-निरंतर भोजन और शयन के समय भी प्रभु में मन लगाये रहता था तथा विष्णु के उदार चरित्र का बार-बार गायन करता रहता था ॥ २ ॥

विष्णु के स्थानक नारायण के श्रेष्ठ क्षेत्र को प्राप्त कर वह वहाँ सुन्दर ताल एवं लय से युक्त प्रभु का गान करता था ॥ ३ ॥

मूर्च्छना-मूर्च्छा के योग से श्रुतिमंडल से वेदित भक्तियोग को प्राप्त होकर भिक्षा का भोजन करता था ॥ ४ ॥

पद्माक्ष नाम से सुविख्यात कोई एक ब्राह्मण इसे गाता हुआ देखकर इसे सदा अन्न देता था ॥ ५ ॥

सकुटुंबो महातेजा अश्नन्नन्नं च तस्य वै ।
कौशिको हि तदा हृष्टो गायन्नास्ते हरिं प्रभुम् ॥ ६ ॥
शृण्वन्नास्ते स पद्माक्षः काले काले च भक्तितः ।
कालयोगेन संप्राप्ताः शिष्या वै कौशिकस्य च ॥ ७ ॥
सप्तराजन्यवैश्यानां विप्राणां कुलसंभवाः ।
ज्ञानविद्याधिकाः शुद्धा वासुदेवपरायणाः ॥ ८ ॥
तेषामपि तथान्नाद्यं पद्माक्षः प्रददौ स्वयम् ।
शिष्यैश्च सहितो नित्यं कौशिको हृष्टमानसः ॥ ९ ॥
विष्णुस्थले हरिं तत्र आस्ते गायन्यथाविधि ।
तत्रैव मालवो नाम वैद्यो विष्णुपरायणः ॥ १० ॥
दीपमालां हरेर्नित्यं करोति प्रीतमानसः ।
मालतीनाम भार्यासीत्तस्य नित्यं पतिव्रता ॥ ११ ॥
गोमयेन समालिप्य हरेः क्षेत्रं समंततः ।
भर्त्रा सहास्ते संप्रीता शृण्वती गानमुत्तमम् ॥ १२ ॥
कुशस्थलीसमुत्पन्ना ब्राह्मणाः शंसितव्रताः ।
पंचाशद्वै समापन्ना हरेर्गानार्थमुत्तमाः ॥ १३ ॥
साधयंतो हि कार्याणि कौशिकस्य महात्मनः ।
गानविद्यार्थतत्त्वज्ञाः शृण्वंतो ह्यवसंस्तु ते ॥ १४ ॥
ख्यातमासीत्तदा तस्य गानं वै कौशिकस्य च ।
श्रुत्वा राजा समभ्येत्य कालिंगो वाक्यमब्रवीत् ॥ १५ ॥
कौशिकः स्वगणैः सार्धं गायस्वेह च मां पुनः ।
शृणुध्वं च तथा यूयं कुशस्थलजना अपि ॥ १६ ॥
तच्छ्रुत्वा कौशिकः प्राह राजानं सांत्वयन्गिरा ।
न जिह्वाग्रे महाराज वाणी च मम सर्वदा ॥ १७ ॥
हरेरन्यमपींद्रं वा स्तौति नापि न वक्ति च ।
एवमुक्ते च तच्छिष्या वसिष्ठो गौतमोऽरुणिः ॥ १८ ॥
सारस्वतस्तथा वैश्यश्चित्रमालस्तथा शिशुः ।
ऊचुस्तं पार्थिवं तत्त्वं यथा प्राह स कौशिकः ॥ १९ ॥
श्रीकराश्च तथा प्रोचुः प्रार्थिवं विष्णुतत्पराः ।
श्रोत्राणीमानि शृण्वंति हरेरन्यं न पार्थिव ॥ २० ॥

वह महातेजस्वी कौशिक कुटुम्ब-सहित उसका दिया भोजन करता था, और (कौशिक) हमेशा प्रसन्न होकर हरि का गान करता था ॥ ६ ॥

वह पद्माक्ष समय-समय पर भक्तिपूर्वक उसका श्रवण करता था। कौशिक को समय बीतने पर शिष्य प्राप्त हुए ॥ ७ ॥

क्षत्रिय, वैश्य और ब्राह्मण-कुल में उत्पन्न (हुए), शुद्धहृदय के, ज्ञान-विद्या में अधिक वासुदेवपरायण ऐसे सात शिष्य थे ॥ ८ ॥

पद्माक्ष उनको भी अन्न प्रदान करता था। शिष्यों के साथ कौशिक सदा प्रसन्न रहता था ॥ ९ ॥

वहाँ विष्णु के स्थान में विधिपूर्वक नारायण का गान करता (हुआ) मालव नाम का विष्णुपरायण एक वैद्य (भी) निवास करता था ॥ १० ॥

(वह) प्रसन्न-चित्त होकर सदा विष्णु के लिए दीपमाला करता था। सदा पतिव्रता मालती नाम की उसकी पत्नी थी ॥ ११ ॥

वह विष्णु के क्षेत्र को चारों ओर से गोबर से पोतकर प्रसन्न-मन होकर पति के साथ उत्तम गान का श्रवण करती थी ॥ १२ ॥

कुशस्थली में जन्म लेनेवाले सुन्दर व्रतवाले पचास उत्तम ब्राह्मण गान के लिए (वहाँ) आ पहुँचे ॥ १३ ॥

महात्मा कौशिक के कार्य को साधित करते हुए गानविद्या के तत्त्व को जाननेवाले वे (हरिगान) सुनते हुए वहाँ रहने लगे ॥ १४ ॥

उन दिनों कौशिक का गान सर्वत्र प्रसिद्ध हो गया था। कलिंगराज यह सुनकर स्वयं वहाँ आकर बोले— ॥ १५ ॥

"हे कौशिक ! अपने गणों के साथ तुम हमारा गान करो, तथा हे कुशस्थलवासी लोग ! तुम उसका श्रवण करो" ॥ १६ ॥

यह सुनकर वाणी से राजा को (आश्वस्त) करते हुए कौशिक बोला– "हे महाराज ! जिह्वा के अग्र भाग पर मेरी वाणी हमेशा ॥ १७ ॥

विष्णु को छोड़कर इन्द्र की भी स्तुति नहीं करती या (उसके बारे में) बोलती भी नहीं।" इस प्रकार कहने पर उसके शिष्य वसिष्ठ, गौतम, आरुणि, ॥ १८ ॥

सारस्वत, वैश्य, चित्रमाल और शिशु जिस प्रकार कौशिक ने कही थी, उस प्रकार यथार्थ बात राजा को कहने लगे ॥ १९ ॥

विष्णुपरायण श्रीकर राजा से कहने लगे— "हमारे कान हरि के सिवा किसी भी दूसरे राजा के (गुणानुवाद) नहीं सुनते ॥ २० ॥

मा ते कीर्तिं वयं तस्माच्छृणुमो नैव वा स्तुतिम् ।
तच्छ्रुत्वा पार्थिवो रुष्टो गीयतामिति चाब्रवीत् ॥ २१ ॥
स्वभृत्यान्ब्राह्मणा ह्येते कीर्तिं शृण्वंति वै यथा ।
न शृण्वंति कथं तस्माद्गीयमानां समंततः ॥ २२ ॥
एवमुक्तास्ततो भृत्या जगुः पार्थिवसत्तमम् ।
निरुद्धकर्णा विप्रास्ते गाने वृत्ते सुदुःखिताः ॥ २३ ॥
काष्ठशंकुभिरन्योन्यं श्रोत्राणि बिभिदुः किल ।
कौशिकाद्यास्तु तां ज्ञात्वा मनोवृत्तिं नृपस्य वै ॥ २४ ॥
निर्बन्धं कुरुते कस्मात्स्वगानेऽसौ नृपः स्थिरम् ।
इत्युक्त्वा ते सुनियता जिह्वाग्रं चिच्छिदुः स्वकम् ॥ २५ ॥
ततो राजा सुसंक्रुद्धः स्वदेशात्तान्व्यवासयत् ।
आदाय वित्तं सर्वेषां ततस्ते जग्मुरुत्तराम् ॥ २६ ॥
दिशामासाद्य कालेन कालधर्मेण योजिताः ।
तानागतान्यमो दृष्ट्वा किंकर्तव्यमिति स्म ह ॥ २७ ॥
विस्मितस्तत्क्षणे विप्र ब्रह्मा प्राह सुराधिपान् ।
कौशिकादीन्द्विजानद्य वासुदेवपरायणान् ॥ २८ ॥
गानयोगेन ये नित्यं पूजयंति जनार्दनम् ।
तानानयत भद्रं वो यदि देवत्वमिच्छथ ॥ २९ ॥
इत्युक्ता लोकपालास्ते कौशिकेति पुनःपुनः ।
मालतीति तथा केचित्पद्माक्षेति तथापरे ॥ ३० ॥
क्रोशमानाः समभ्येत्य तानादाय विहायसा ।
ब्रह्मलोकं गताः शीघ्रं मुहूर्तार्द्धेन वै सुराः ॥ ३१ ॥
कौशिकादींस्तथा दृष्ट्वा ब्रह्मा लोकपितामहः ।
प्रत्यागम्य यथान्यायं स्वागतेनाभ्यपूजयत् ॥ ३२ ॥
ततः कोलाहलश्चाभूदतिगौरवमुल्बणम् ।
ब्रह्मणा च कृतं दृष्ट्वा देवानां द्विजसत्तम ॥ ३३ ॥
हिरण्यगर्भो भगवांस्तान्निवार्य सुरोत्तमान् ।
कौशिकादींस्तदादाय मुनिर्देवैः समावृतः ॥ ३४ ॥

अतः हम आपकी कीर्ति या स्तुति नहीं सुनेंगे।" यह सुनते ही क्रोधित होकर राजा ने कहा, 'गाओ' ॥ २१ ॥

(ऐसा) अपने सेवकों से कहा (कि), जिस प्रकार ये ब्राह्मण हमारी कीर्ति सुनें (उस प्रकार गाओ)। चारों ओर गायी जानेवाली (हमारी कीर्ति) को ये क्यों नही सुनते ? ॥ २२ ॥

इस प्रकार के वचन कहे जाने पर सेवक लोग द्वारा (उस) पार्थिवश्रेष्ठ (की कीर्ति) का गान होने पर उन अत्यन्त दुःखी ब्राह्मणों ने अपने कान बन्द कर लिये ॥ २३ ॥

(राजा ने मन में सोचा कि) इनके कान का लकड़ी की कीलों से भेदन किया जाय। राजा की इस मनोवृत्ति को जानकर कौशिक वग़ैरः (को दुःख हुआ कि) ॥ २४ ॥

"यह राजा अपने गान के लिए दुराग्रह क्यों करता है ?" ऐसा कह कर अच्छी तरह से नियंत्रित उन लोगों ने (अपने-आप) अपनी जिह्वा के अग्र भाग का छेदन कर दिया ॥ २५ ॥

तब राजा ने अतिशय क्रोधित होकर अपने देश से उनको निर्वासित कर दिया। उन सबका (सारा) द्रव्य छीन लिया गया। तब वे (ब्राह्मण) उत्तर दिशा की ओर चल पड़े ॥ २६ ॥

समय बीतने पर (दक्षिण) दिशा को प्राप्त करके यम से योजित हुए। उनको आते हुए देख 'मुझे क्या करना चाहिए' (ऐसा सोचकर) यम— ॥ २७ ॥

विस्मित हुए, उस समय (हे विप्र !) ब्रह्मा ने देवाधिपतियों से कहा— "वासुदेवपरायण कौशिक ब्राह्मण (जो कि) गानयोग से हमेशा जनार्दन की पूजा करते हैं, यदि आपको देवत्व की इच्छा हो तो उन्हें ले आइए। आपका कल्याण हो" ॥ २८-२९ ॥

इस प्रकार (संबोधनपूर्वक) प्रेरित किये गये वे लोकपाल बार-बार 'हे कौशिक', तो कोई 'हे मालति', तथा अन्य 'हे पद्माक्ष', ॥ ३० ॥

इसी प्रकार पुकारते हुए उनके पास जाकर आकाश-मार्ग से उन्हें ले जाकर वे देवता लोग आधे मुहूर्त में ही शीघ्र ब्रह्मलोक (में) पहुँच गये ॥३१॥

उस प्रकार कौशिकादि को देखकर लोकपितामह ब्रह्माजी ने अभिवादनपूर्वक उनका यथायोग्य स्वागत किया ॥ ३२ ॥

तब हे द्विजश्रेष्ठ ! ब्रह्माजी द्वारा संपन्न किये गये इस स्वागत को देखकर देवताओं में बड़ा भारी कोलाहल मच गया ॥ ३३ ॥

भगवान् हिरण्यगर्भ (ब्रह्माजी) ने सारे देवताओं का निवारण किया। देवताओं के साथ कौशिकादि को लेकर वह मुनि ॥ ३४ ॥

विष्णुलोकं ययौ शीघ्रं वासुदेवपरायणः ।
तत्र नारायणो देवः श्वेतद्वीपनिवासिभिः ॥ ३५ ॥

ज्ञानयोगेश्वरैः सिद्धैर्विष्णुभक्तिपरायणैः ।
नारायणसमैर्दिव्यैश्चतुर्बाहुधरैः शुभैः ॥ ३६ ॥

विष्णुचिह्नसमापन्नैर्दीप्यमानैरकल्मषैः ।
अष्टाशीतिसहस्रैस्तु सेव्यमानो मनोजवैः ॥ ३७ ॥

अस्माभिर्नारदाद्यैश्च सनकाद्यैरकल्मषैः ।
भूतैर्नानाविधैश्चैव दिव्यस्त्रीभिः समंततः ॥ ३८ ॥

सेव्यमानोऽथ मध्ये वै सहस्रद्वारसंवृते ।
सहस्रयोजनायामे दिव्ये मणिमये शुभे ॥ ३९ ॥

विमाने विमले चित्रे भद्रपीठासने हरिः ।
लोककार्यप्रसक्तानां दत्त्वा दृष्टिं समास्थितः ॥ ४० ॥

तस्मिन्कालेऽथ भगवान्कौशिकाद्यैश्च संवृतः ।
आगम्य प्रणिपत्याग्रे तुष्टाव गरुडध्वजम् ॥ ४१ ॥

ततोऽवलोक्य भगवान्हरिर्नारायणः प्रभुः ।
कौशिकेत्याह संप्रीत्या तान्सर्वांश्च यथाक्रमम् ॥ ४२ ॥

जयघोषो महानासीन्महाश्चर्ये समागते ।
ब्रह्माणमाह विश्वात्मा शृणु ब्रह्मन्यथोदितम् ॥ ४३ ॥

कौशिकस्य च ये विप्राः साध्यसाधनतत्पराः ।
हिताय संप्रवृत्ता वै कुशस्थलनिवासिनः ॥ ४४ ॥

मत्कीर्तिश्रवणे युक्ता गानतत्त्वार्थकोविदाः ।
अनन्यदेवताभक्ताः साध्या देवा भवन्त्विमे ॥ ४५ ॥

मत्समीपे तथा ह्यस्य प्रवेशं देहि सर्वदा ।
एवमुक्त्वा पुनर्देवः कौशिकं प्राह माधवः ॥ ४६ ॥

स्वशिष्यैस्त्वं महाप्राज्ञ दिग्बलो नाम वै सदा ।
गणाधिपत्यमापन्नो यत्राहं तत्समास्व वै ॥ ४७ ॥

मालतीमालवं चेति प्राह दामोदरो वचः ।
मम लोके यथाकामं भार्यया सह मालव ॥ ४८ ॥

वासुदेवपरायण शीघ्र ही विष्णुलोक को गये। वहाँ भगवान् नारायण श्वेतद्वीप में निवास करनेवाले ॥ ३५ ॥

ज्ञानयोगेश्वर, सिद्ध, विष्णुभक्तिपरायण, नारायण के समान दिव्य, चार भुजाओं को धारण करनेवाले, विष्णु के शुभ चिह्नों (शंख-चक्रादि) से युक्त, देदीप्यमान, पापरहित, अट्ठासी हजार मनोवेगी उन (महात्माओं) से सेवित ॥ ३६-३७ ॥

तथा हम, नारद (वगैरः), निष्पाप सनकादि, अनेक प्रकार के प्राणियों तथा दिव्य स्त्रियों से चारों ओर से ॥ ३८ ॥

सेव्यमान (थे) तथा सहस्रद्वार से युक्त सहस्र योजन लम्बे, दिव्य, मणिमय, शुभ ॥ ३९ ॥

(पवित्र) निर्मल चित्र-विचित्र विमान में भद्रपीठ आसन पर हरि लोककार्य में संलग्न पुरुषों की ओर देखते हुए स्थित थे ॥ ४० ॥

उस समय कौशिकादि से संवृत भगवान (ब्रह्मा) ने आकर प्रणाम करके गरुड़ध्वज (विष्णु) की स्तुति की ॥ ४१ ॥

तब भगवान् नारायण प्रभु (उन्हें) देखकर प्रसन्नतापूर्वक बोले— "कौशिक !" और बाद में यथाक्रम उन सबसे बोले ॥ ४२ ॥

(यह) महान आश्चर्य (घटित) होने पर बड़ा जयघोष होने लगा। विश्वात्मा (नारायण) ब्रह्माजी से कहने लगे— "हे ब्रह्मन् ! मेरा कहना सुनिए ॥ ४३ ॥

कुशस्थल के निवासी जो ब्राह्मण कौशिक के साध्य को सिद्ध करने में तत्पर हैं (उन कौशिक के) हित के लिए प्रवृत्त हैं ॥ ४४ ॥

मेरी कीर्ति का श्रवण करने में युक्त हैं, गान के तत्त्वार्थ को अच्छी तरह से जानते हैं, (तथा) देवता के अनन्य भक्त हैं वे साध्य देव हो जायँ ॥ ४५ ॥

तथा उन्हें सर्वदा हमारे समीप प्रवेश दिया जाय।" ऐसा कहकर भगवान माधव पुनः कौशिक से कहने लगे— ॥ ४६ ॥

"महाप्राज्ञ ! तुम अपने शिष्यों के साथ 'दिग्बल' नामक गणाधिपत्य को प्राप्त करके जहाँ मैं स्थित हूँ वहाँ निवास करो" ॥ ४७ ॥

और मालती-सहित मालव से दामोदर ये वचन कहने लगे—" हे मालव ! तुम पत्नी के साथ मेरे लोक में अपनी इच्छा के अनुसार ॥ ४८ ॥

दिव्यरूपधरः श्रीमाञ्छृण्वन्गानमिहानुगैः ।
आस्व नित्यं यथाकामं यावल्लोका भवंति वै ॥ ४९ ॥
पद्माक्षमाह भगवान् धनदो भव मानद ।
धनानामीश्वरो भूत्वा विहरस्व यथासुखम् ॥ ५० ॥
ब्रह्माणं च ततः प्राह कौशिकोऽभूद्गणाधिपः ।
गणाः स्तोष्यंति तं चाशु प्राप्तो मेऽस्ति सलोकताम् ॥ ५१ ॥
एते च विप्रा नियतं मम भक्ता यशस्विनः ।
श्रोत्रच्छिद्रं यथाहत्य शंकुभिर्वै परस्परम् ॥ ५२ ॥
श्रोष्यामो नैव चान्यद्वै हरेः कीर्तिं विनेति ये ।
महाव्रतधरा विप्रा मम भक्तिपरायणाः ॥ ५३ ॥
एते प्राप्ताश्च देवत्वं मम सान्निध्यमेव च ।
मालवो भार्यया सार्धं मत्क्षेत्रं परिगृह्य वै ॥ ५४ ॥
गानमानादिभिर्नित्यमभ्यर्च्य सततं हि माम् ।
गानं शृणोति नियतो मत्कीर्तिचरितान्वितम् ॥ ५५ ॥
तेनासौ प्राप्तवाँल्लोकं मम ब्रह्मन् सनातनम् ।
पद्माक्षोऽसौ महाभागः कौशिकस्य महात्मनः ॥ ५६ ॥
धनेशत्वमवाप्तोऽसौ मम सान्निध्यमेव च ।
एवमुक्त्वा हरिस्तत्र समास्ते लोकपूजितः ॥ ५७ ॥
ततो हरिर्भक्तजनैः समावृतः सुखेन तस्थौ कनकासने शुभे ।
भक्तैकगम्यो निजभक्तलोकान्स लालयन्पाणिसरोरुहेण ॥ ५८ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अद्भुतोत्तरकाण्डे
आदिकाव्ये जानकीजन्मकारणकथनं नाम
पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः

तस्मिन्क्षणे समारब्धो मधुराक्षरपेशलैः ।
महामहोत्सवस्तत्र कौशिकप्रीतयेऽद्भुतः ॥ १ ॥
विपंचीगुणतत्त्वज्ञैर्वाद्यविद्याविशारदैः ।
ततस्तच्छ्रवणायालं चेटीकोटिसमावृता ॥ २ ॥

दिव्य रूप धारण किये, श्रीयुक्त होकर अनुचरों के सहित गान-
श्रवण करते हुए तब तक निवास करो, जब तक ये लोक हैं" ॥ ४९ ॥

फिर भगवान ने पद्माक्ष से कहा— "हे माननीय ! तुम धनपति
धनी । धन के स्वामी बनकर तुम यथासुख विहार करो" ॥ ५० ॥

और बाद में भगवान ने ब्रह्माजी से कहा— "कौशिक गणाधिपति
गणे । गण उसकी स्तुति करेंगे और वह शीघ्र ही मेरी सलोकता को
प्राप्त करेगा ॥ ५१ ॥

और ये मेरे भक्त, यशस्वी, ब्राह्मण एक-दूसरे के कानों के छिद्रों को
कानों से आहत करके— ॥ ५२ ॥

हरि की कीर्ति के सिवा दूसरा कुछ नहीं सुनेंगे —इस प्रकार के
व्रह्म व्रत को धारण करनेवाले, मेरी भक्ति में परायण विप्र ॥ ५३ ॥

देवत्व को तथा मेरे सान्निध्य को प्राप्त हो। पत्नी के साथ मालव
मेरे क्षेत्र को घेरकर हमेशा गान-मानादि से मेरी पूजा करके मेरी कीर्ति
तथा चरित्रयुक्त गान श्रवण करता रहे ॥ ५४-५५ ॥

इससे (उसे) हे ब्रह्मन् ! मेरा सनातन लोक प्राप्त हुआ है।
महात्मा कौशिक का यह महाभाग (शिष्य) पद्माक्ष ॥ ५६ ॥

धनेशत्व को तथा मेरे सान्निध्य को प्राप्त हो।" इस प्रकार कहकर
समस्त लोकों से पूजित हरि स्थित हुए ॥ ५७ ॥

तब भक्तजनों से घिरे हुए केवल भक्तों के लिए ही गम्य, अपने हस्त-
कमलों से भक्तों का लालन करते हुए हरि सुवर्ण के सुन्दर आसन पर
विराजमान हुए ॥ ५८ ॥

॥ इति श्रीवाल्मीकि-विरचित आदिकाव्य रामायण के अद्भुतोत्तर
काण्ड में 'जानकी-जन्म का कारण' नाम
पंचम सर्ग समाप्त ॥ ५ ॥

षष्ठ सर्ग

हरिमित्रोपाख्यान

उस समय कौशिक की प्रीति के लिए, मधुर अक्षरों से युक्त वीणा के
गुण और तत्वों को जाननेवालों ने तथा वाद्यविद्या में विशारदों ने
महामहोत्सव का प्रारम्भ किया। तब उसका श्रवण करने के लिए करोड़ों
दासियों से घिरी हुई ॥ १-२ ॥

गायमाना समायाता लक्ष्मीर्विष्णुपरिग्रहः ।
वृता सहस्रकोटीभिर्वेत्रपाणिभिराशुगैः ॥ ३ ॥
ब्रह्मादिसुरसंघानां घनं दृष्ट्वा समागमम् ।
चेटीगणाधिपा रुष्टा भुशुंडीपरिघान्विताः ॥ ४ ॥
ब्रह्मादींस्तर्जयंत्यस्तान्मुनींश्चापि समन्ततः ।
उत्सार्य दूरं संहृष्टा विष्ठिताः पर्वतोपमाः ॥ ५ ॥
सर्वे बहिर्विनिर्याताः सार्द्धं वै ब्रह्मणा सुराः ।
युक्तमित्येव भाषन्तः प्रभोरग्रे वयं तु के ॥ ६ ॥
तस्थुः प्रांजलयः सर्वे त्रिदशागत मन्यवः ।
तस्मिन्क्षणे समाहूतस्तुम्बुरुर्मानपूर्वकम् ॥ ७ ॥
प्रविवेश समीपं वै देव्या देवस्य चैव हि ।
तत्रासीनो यथायोगं नानामूर्च्छाक्षरान्वितम् ॥ ८ ॥
जगौ कलपदं हृष्टो विपंचीं चाप्यवादयत् ।
विष्णुना कौशिकप्रीत्यै प्रयुक्तो गायकोत्तमैः ॥ ९ ॥
नानारत्नसमायुक्तैर्दिव्यैराभरणोत्तमैः ।
दिव्यमाल्यैश्च वसनैः पूजितो विष्णुमंदिरात् ॥ १० ॥
निर्गतस्तुम्बुरुर्हृष्टो जगाम स यथागतम् ।
ब्रह्माद्यास्त्रिदशाः सर्वे मुनयश्च यथागतम् ॥ ११ ॥
जग्मुर्विष्णुं प्रणम्योच्चैर्जयेति भाषिणस्ततः ।
नारदोऽथ मुनिर्दृष्ट्वा तुंबुरोः सत्क्रियां हरेः ॥ १२ ॥
शोकाविष्टेन मनसा संतप्तहृदयेक्षणः ।
चिन्तामापेदिवांस्तत्र शोकमूर्च्छाकुलांतरः ॥ १३ ॥
ततः क्रोधेन महता जज्वाल मुनिपुंगवः ।
लक्ष्मीं शशाप सहसा तद्दासीभिस्तिरस्कृतः ॥ १४ ॥
यदहं राक्षसं भावं गृहीत्वा विष्णुकांतया ।
चेटीभिर्वारितो दूरं वेत्राघातेन ताडितः ॥ १५ ॥
तस्मात्संजायतां लक्ष्मी रक्षसांगर्भसंभवा ।
यतोऽहं बहिराक्षिप्तश्चेटीभिः सावहेलनम् ॥ १६ ॥
हेलया राक्षसी च त्वां बहिः क्षेप्स्यति भूतले ।
इत्युक्ते नारदे नाथ चकंपे भुवनत्रयम् ॥ १७ ॥

हाथ में वेत्र धारण करनेवाली, शीघ्र गमन करनेवाली हजारों दासियों के साथ गान करती हुई विष्णु-परिग्रहा लक्ष्मी प्राप्त हुईं ॥ ३ ॥

तब ब्रह्मा वगैरः देवताओं का घना समागम देखकर भुशुण्डी-शस्त्र-धारी चेटीगणों के अधिपति रुष्ट हुए ॥ ४ ॥

वे ब्रह्मा आदि उन मुनियों का चारों ओर से तिरस्कार करने लगे। उन्हें दूर (बिठा) करके स्वयं आनन्दित होकर पर्वत के समान (वहाँ) बैठ गये ॥ ५ ॥

ब्रह्मा के साथ बाहर निकाले गये सारे देवता लोग कहने लगे—"ठीक ही तो है। भगवान के सामने हम कौन होते हैं ?" ॥ ६ ॥

अतः क्रोधरहित सब देवता हाथ जोड़कर खड़े रहे। उस समय तुम्बुरु (गंधर्व) को मानपूर्वक बुलाया गया ॥ ७ ॥

वह देवी और देव के निकट आया। वहाँ उचित रूप से बैठकर अनेक मूर्च्छनाओं से युक्त मधुर पद (वह) आनंदित होकर गाने लगा तथा वीणा भी बजाने लगा। कौशिक की प्रीति के लिए विष्णु ने उत्तम गायक नियुक्त किया ॥ ८-९ ॥

अनेक विध रत्नों से युक्त उत्तम, दिव्य आभूषणों से तथा दिव्य माला और वस्त्रों से पूजित होकर (वह) विष्णु के मंदिर से आनंदित होकर जैसा आदरपूर्वक तुम्बुरु आया था, वैसा ही विदा हुआ। ब्रह्मा आदि देवता तथा सब मुनि भी जैसे आये थे, उसी प्रकार ॥ १०-११ ॥

विष्णु को प्रणाम करके 'जय हो' ऐसा कहते हुए विदा हुए। अब नारदमुनि विष्णु द्वारा किया हुआ तुम्बुरु का सत्कार देखकर ॥ १२ ॥

शोकपूर्ण मन से, संतप्त हृदय से और शोक की मूर्च्छा से व्यथित अंतःकरण वाले होकर सोचने लगे ॥ १३ ॥

तब वह मुनिश्रेष्ठ महा क्रोध से जलने लगे। उन (लक्ष्मीजी) की दासियों से तिरस्कृत (मुनि) ने सहसा लक्ष्मीजी को शाप दे दिया ॥ १४ ॥

"विष्णुपत्नी ने मुझे राक्षसभाव से ग्रहण करके दासियों द्वारा बहिष्कृत करवाया है तथा वेत्रघात से ताड़न करवाया है ॥ १५ ॥

इसलिए राक्षस के गर्भ से लक्ष्मी का जन्म होगा। मैं चेटियों द्वारा तिरस्कारपूर्वक बाहर निकाला गया हूँ ॥ १६ ॥

अतः राक्षसी लीलापूर्वक तुमको पृथ्वी पर बाहर फेंक देगी।" नारद ने जब इस प्रकार कहा, तब तीनों भुवन कंपित हो उठे ॥ १७ ॥

हाहाकारं ततश्चक्रुर्देवगंधर्वदानवाः ।
नारदो विललापाथ धिग्धिङ् मामिति च ब्रुवन् ॥ १८ ॥
नारायणसमायोगो महालक्ष्मीसमीपतः ।
अहो तुंबुरुणा प्राप्तो धिङ्मां मूढमचेतनम् ॥ १९ ॥
योऽयं हरेः सन्निकासाद्दूतैर्निर्वासितः कथम् ।
जीवन्यास्यामि कुत्राहं किं मे तुंबुरुणा कृतम् ॥ २० ॥
रोदमानो मुहुर्विद्वान्धिङ् मामिति च चिंतयन् ।
ततो नारायणो लक्ष्म्याः शापं श्रुत्वा सुदारुणम् ॥ २१ ॥
लक्ष्म्या सह हृषीकेश आजगाम यतो मुनिः ।
रमा प्रसाद्य तं विप्रं प्रत्युवाच कृतांजलिः ॥ २२ ॥
यदुक्तं भवता मह्यं तत्तथा न तदन्यथा ।
तत्र किंचित्प्रार्थयामि मुने तत्कृपया कुरु ॥ २३ ॥
आरण्यानां मुनीनां वै स्तोकं स्तोकं च शोणितम् ।
कलशापूरितं भक्षेद्राक्षसी या च कामतः ॥ २४ ॥
तस्या गर्भे भविष्यामि तच्छोणितसमुद्भवा ।
इत्युक्तं रमयाचिंत्यासंभवान्नो भवेदिति ॥ २५ ॥
नारदस्तु तथेत्याह अस्याः सर्वं हि दारुणम् ।
ततो नारायणो देवः प्रोक्तवान्नारदं मुनिम् ॥ २६ ॥
नाहं दानेन तपसा नेज्यया नापि तीर्थतः ।
संतुष्यामि द्विजश्रेष्ठ यथा नाम्नां प्रकीर्तितः ॥ २७ ॥
गानेन नामगुणयोर्मम सायुज्यमाप्नुयात् ।
निदर्शनं कौशिकोत्र गानान्मल्लोकमाप्तवान् ॥ २८ ॥
मूर्च्छनादियुतं गानं नाम्नामति मम प्रियम् ।
तुंबुरुस्तत्प्रभावेण प्रियस्त्वत्तोपि मे द्विज ॥ २९ ॥
मूर्च्छनातालयोगेन गानेन त्वं तथा भव ।
उलूकं पश्य गत्वा [illegible]ं यदि गाने मतिस्तव ॥ ३० ॥
मानसोत्तरशैले तु गानबंधुरिति स्मृतः ।
तद्गच्छ शीघ्रं शैले गानवांस्त्वं भविष्यसि ॥ ३१ ॥

उस समय देव-गंधर्व और दानव हाहाकार करने लगे, तथा 'मुझे धिक्कार हो' ऐसा बोलते हुए नारद विलाप करने लगे— ॥ १८ ॥

"अहो ! तुम्बुरु को महालक्ष्मी के समीप नारायण का योग प्राप्त हुआ। मूढ़ अचेतन मुझे धिक्कार हो ॥ १९ ॥

दूतों द्वारा विष्णु के सान्निध्य से क्यों दूर किया गया ? अब जीता हुआ मैं कहाँ जाऊँगा ? तुम्बुरु ने मेरी क्या दुर्दशा कर दी ?" ॥ २० ॥

वह विद्वान् 'मुझे धिक्कार हो', ऐसा सोचकर बार-बार रोने लगे। (तब) लक्ष्मी को (दिये गये) दारुण शाप को सुनकर नारायण ॥ २१ ॥

हृषीकेश लक्ष्मी के साथ जहाँ मुनि थे, वहाँ पधारे। मुनि को प्रसन्न करके हाथ जोड़कर लक्ष्मीजी बोलीं— ॥ २२ ॥

"आपने मुझे जो कहा है, वह वैसा ही होगा, अन्यथा नहीं होगा। उसके बारे में मैं कुछ विनती करती हूँ। हे मुनि ! कृपा करके वैसा कीजिए ॥ २३ ॥

कलश में भरा हुआ वनवासी ऋषियों का थोड़ा-थोड़ा रक्त जो राक्षसी अपनी इच्छा से भक्षण करेगी ॥ २४ ॥

उसी के गर्भ से उस रुधिर से मैं स्वयं जन्म लूंगी", पुनः लक्ष्मी ने कहा— "(परन्तु) ऐसा कार्य अचिन्त्य होने के कारण संभव प्रतीत नहीं होता" ॥ २५ ॥

नारद ने कहा— "वैसा ही होगा। परन्तु इस प्रसंग में सब कुछ दारुण ही दारुण (भयंकर) है।" तब भगवान नारायण ने नारद मुनि से कहा— ॥ २६ ॥

"हे द्विजश्रेष्ठ ! मैं दान, तप, यज्ञ या तीर्थ से वैसा संतुष्ट नहीं होता, जैसा नामसंकीर्तन से होता हूँ ॥ २७ ॥

(मेरे) नाम और गुण के गान से भक्त सायुज्य को प्राप्त होता है। यहाँ उदाहरणरूप है कौशिक, जिसने गान से सालोक्य-मुक्ति प्राप्त की है ॥ २८ ॥

मूर्च्छना आदि से जो मेरा नामसंकीर्तन करता है, वह मेरा अति प्रिय होता है। इसी के प्रभाव से हे द्विज, मुझे तुमसे भी अधिक तुम्बुरु प्रिय है ॥ २९ ॥

तुम (भी) मूर्च्छना ताल से युक्त गान द्वारा वैसी योग्यता प्राप्त कर लो। यदि गान में तुम्हारी रुचि है तो जाकर उलूक से मिलो ॥३०॥

मानसरोवर के उत्तर में पर्वत पर वह 'गानबंधु' नाम से विख्यात है। तो तुम शीघ्र ही उस पर्वतश्रेष्ठ (की दिशा में) चले जाओ। तुम गान-विद्या-संपन्न हो जाओगे" ॥ ३१ ॥

इत्युक्तो विस्मयाविष्टो नारदो वाग्विदां वरः ।
मानसोत्तरशैले तु गानबंधुं जगाम वै ॥ ३२ ॥

गंधर्वाः किन्नरा यक्षास्तथा चाप्सरसां गणाः ।
समासीनास्तु परितो गानबंधुश्च मध्यतः ॥ ३३ ॥

गानशिक्षासमापन्नाः शिक्षितास्तेन पक्षिणा ।
स्निग्धकंठस्वरास्तत्र समासीना मुदान्विताः ॥ ३४ ॥

ततो नारदमालोक्य गानबंधुरुवाच ह ।
प्रणिपत्य यथा न्याय्यं स्वागतेनाभ्यपूजयत् ॥ ३५ ॥

किमर्थं भगवन्नत्र चागतोऽसि महाद्युते ।
किं कार्यं हि महाब्रह्मन्ब्रूहि किं करवाणि ते ॥ ३६ ॥

तच्छ्रुत्वा नारदो धीमान्प्रत्युवाच स पक्षिणम् ।
उलूकेन्द्र महाप्राज्ञ शृणु सर्वं यथातथम् ॥ ३७ ॥

मम वृत्तं प्रवक्ष्यामि तच्च भूतं महाद्भुतम् ।
वैकुण्ठनगरेब्रह्मन्नारायणसमीपगम् ॥ ३८ ॥

मां विनिर्धूय संदृष्टं समाहूय च तुंबुरुम् ।
लक्ष्मीसमन्वितो विष्णुरशृणोद्गानमुत्तमम् ॥ ३९ ॥

ब्रह्मादयो वयं सर्वे निरस्ताः स्थानतश्च्युताः ।
कौशिकाद्याः समासीना गानयोगेन वै हरिम् ॥ ४० ॥

समाराध्यैव संप्राप्ता गाणपत्यं यथासुखम् ।
तेनाहमतिदुःखार्तो यत्तप्तं तु मया तपः ॥ ४१ ॥

यद्दत्तं यद्धुतं चैव यच्चापि श्रुतमेव हि ।
यदधीतं च गानस्य कलां नार्हति षोडशीम् ॥ ४२ ॥

विष्णोर्माहात्म्ययुक्तस्य गानयोगस्य वै ततः ।
पश्चात्तापं च मे दृष्ट्वा [illegible] च नारायणोऽब्रवीत् ॥ ४३ ॥

उलूकं गच्छ देवर्षे [illegible]ानबन्धुं मतिर्यदि ।
गाने च वर्तते ब्रह्मंस्[illegible] त्वं गानमाप्स्यसि ॥ ४४ ॥

इत्यहंप्रेषितस्तेन [illegible] त्वत्समीपमिहागतः ।
किं करिष्यामि शिष्योहं [illegible] मां पालयाव्यय ॥ ४५ ॥

ऐसा कहने पर वक्ताओं में श्रेष्ठ नारदजी विस्मययुक्त मानसोत्तर पर्वत पर 'गानबंधु' के पास गये ॥ ३२ ॥

वहाँ गंधर्व, किन्नर, यक्ष तथा अप्सराओं का समूह चारों ओर बैठा हुआ था तथा मध्य में 'गानबंधु' विराजमान थे ॥ ३३ ॥

उस पक्षी ने अनेकों को शिक्षित करके गान-विद्या में निपुण कर दिया था। मधुर कंठस्वर वाले अनेक आनंदित हो वहाँ बैठे थे ॥ ३४ ॥

तब नारद को देखकर गानबंधु ने (विधिपूर्वक) प्रणाम करके (नारद का) पूजन से स्वागत किया और बोले— ॥ ३५ ॥

"हे महातेजस्वी भगवान्! आप किस हेतु से यहाँ पधारे हैं? हे महाब्रह्मन्! यहाँ पर आपका क्या काम है? कहिए, मैं आपके लिए क्या करूँ?" ॥ ३६ ॥

यह सुन बुद्धिमान उस पक्षी से नारद ने कहा— "हे महाबुद्धिशाली उलूकेन्द्र! आप सब कुछ सुनिए ॥ ३७ ॥

मैं अपना अति अद्भुत वृत्तान्त आपको बताता हूँ! हे ब्रह्मन्! वैकुण्ठनगर में नारायण के निकट गये हुए ॥ ३८ ॥

"मेरा तिरस्कार करके तुम्बुरु को बुलाकर लक्ष्मी-सहित विष्णु ने उनके गान का श्रवण किया ॥ ३९ ॥

ब्रह्मा आदि हम सब बाहर निकाल दिये गये तथा वहाँ बैठे हुए कौशिक आदि ने गानयोग से हरि का ॥ ४० ॥

समाराधन किया। इससे उन्होंने गाणपत्य पद की सुखपूर्वक प्राप्ति की। इससे मैं दुःख से अत्यंत कातर हो गया हूँ! मैंने जो कुछ तप किया है, ॥ ४१ ॥

जो दान किया है, हवन किया है तथा जो कुछ श्रवण किया है, विद्या प्राप्त की है, वह गान-विद्या की सोलहवीं कला के बराबर भी नहीं है" ॥ ४२ ॥

विष्णु के माहात्म्ययुक्त गानयोग (की अधिकता) को देखकर बने हुए मेरा पश्चात्ताप देखकर नारायण ने कहा— ॥ ४३ ॥

"हे देवर्षि! यदि गान में तुम्हारी इच्छा हो तो गानबन्धु उलूक के पास जाओ, वह गान का आचार्य है। हे ब्रह्मन्! वहाँ तुमको गानप्राप्ति होगी" ॥ ४४ ॥

इस प्रकार उनके द्वारा भेजा हुआ मैं यहाँ आपके पास आया हूँ! "मैं क्या करूँ? हे अव्यय! मैं आपका शिष्य हूँ। आप मेरा पालन कीजिए" ॥ ४५ ॥

नारदं प्राह धर्मात्मा गानबंधुर्महायशाः ।
शृणु नारद यद्वृत्तं पुरा मम महामते ॥ ४६ ॥
अत्याश्चर्यसमायुक्तं सर्वपापहरं शुभम् ।
भुवनेश इति ख्यातो राजाभूद्धार्मिकः पुरा ॥ ४७ ॥

अश्वमेधसहस्रैश्च वाजपेयायुतेन च ।
अन्यैश्च विविधैर्यज्ञैरिष्टवान्भूरिदक्षिणैः ॥ ४८ ॥

गवां कोट्यर्बुदं चैव सुवर्णस्य तथैव च ।
वाससां रथनागानां कन्याऽश्वानां तथैव च ॥ ४९ ॥

दत्त्वा स राजा विप्रेभ्यो मेदिनीं पर्यपालयत् ।
न्यवारयत्स्वके राज्ये गानयोगेन केशवम् ॥ ५० ॥

अन्यं वा गानयोगेन गायेद्यदि स मे भवेत् ।
वध्यः सर्वात्मना तस्माद्वेदैरीड्यः परः पुमान् ॥ ५१ ॥

न ब्राह्मणैश्च गातव्यं वहद्भिर्वेदमुत्तमम् ।
गानयोगेन सर्वत्र स्त्रियो गायंतु मां सदा ॥ ५२ ॥

सूतमागधसंघाश्च गीतं मे कारयन्तु वै ।
इत्याज्ञाप्य महातेजा राज्यं वै पर्यपालयत् ॥ ५३ ॥

तस्य राज्ञः पुराभ्याशे हरिमित्र इति स्मृतः ।
ब्राह्मणो विष्णुभक्तश्च सर्वद्वन्द्वविवर्जितः ॥ ५४ ॥

नदीपुलिनमासाद्य प्रतिमाञ्च हरेः शुभाम् ।
समभ्यर्च्य यथाशास्त्रं घृतदध्युत्तरं बहु ॥ ५५ ॥

मिष्टान्नं पायसं दत्त्वा हरेरावेद्य धूपकम् ।
प्रणिपत्य यथान्यायं तत्र विन्यस्तमानसः ॥ ५६ ॥

अगायत हरिं तत्र तालवीणालयान्वितम् ।
अतीव) स्नेहसंयुक्तस्तद्गीतेनान्तरात्मना ॥ ५७ ॥

ततो रा[illegible] समादेशाद्भटास्तस्य समागताः ।
तदर्चनादि [illegible]लं निर्धूय च समन्ततः ॥ ५८ ॥

ब्राह्मणं च गृ[illegible]ते राज्ञे सम्यङ्न्यवेदयन् ।
ततो राजा [illegible]ष्ठं परिभर्त्स्य सुदुर्मनाः ॥ ५९ ॥

धर्मात्मा, महान् यशस्वी गानबन्धु ने नारद से कहा— "हे नारद ! हे महामति ! मेरे पूर्वजन्म का वृत्तान्त सुनिए ! ॥ ४६ ॥

जो कि अत्यन्त आश्चर्यमय तथा पापों का हरण करनेवाला एवं शुभ है। पहले के जमाने में 'भुवनेश' नाम से सुविख्यात एक धार्मिक राजा था ॥ ४७ ॥

उसने सहस्र अश्वमेध, दस सहस्र वाजपेय तथा और भी अनेक बड़ी-बड़ी दक्षिणा वाले यज्ञ किये ॥ ४८ ॥

(और) करोड़ों गौ, अरबों सुवर्ण-मुद्रा, वस्त्र, रथ, हाथी, कन्या, अश्व आदि ॥ ४९ ॥

(दक्षिणा में) ब्राह्मणों को देकर उस राजा ने पृथ्वी का पालन किया। (तथा) अपने राज्य में गानयोग से केशव का निवारण किया (तथा) उसने घोषणा की— ॥ ५० ॥

'यदि कोई दूसरा (व्यक्ति) गानयोग से (हरि का गान करेगा तो वह मेरे लिए वध्य होगा; कारण, परपुरुष की स्तुति वेद-वचनों से ही की जाती है ॥ ५१ ॥

उत्तम वेदधारी ब्राह्मणों को गान नहीं करना चाहिए। गानयोग से सर्वत्र स्त्रियाँ मेरा गान करें ॥ ५२ ॥

सूत और मागधों के संघ मेरा ही गान करवाये, इस प्रकार आज्ञा करके वह महातेजस्वी (राजा) राज्य का पालन करने लगा ॥ ५३ ॥

उस राजा के नगर के समीप 'हरिमित्र' नाम का सारे द्वन्द्वों से रहित विष्णुभक्त ब्राह्मण था ॥ ५४ ॥

(वह) नदी के किनारे जाकर विष्णु की प्रतिमा का शास्त्रानुसार अर्चन करके घृत, दही-सहित ॥ ५५ ॥

मिष्टान्न तथा खीर देकर एवं भगवान को धूप का निवेदन करके, यथायोग्य प्रणाम करके, उसमें चित्त लगाकर ॥ ५६ ॥

ताल, वीणा, लय-सहित नारायण का गान करता था तथा तन्मयता से गाने के कारण अतिशय स्नेहपूर्ण बन जाता था ॥ ५७ ॥

तब राजा की आज्ञा से वहाँ भट उपस्थित हुए, तथा चारों ओर से पूजन आदि की सामग्री नष्ट करके ॥ ५८ ॥

वे ब्राह्मण को पकड़कर राजा के पास ले गये। तब अत्यन्त दुःखी होकर राजा ने द्विजश्रेष्ठ का तिरस्कार करके ॥ ५९ ॥

राज्यान्निर्वासयामास हृत्वा सर्वधनादिकम् ।
प्रतिमां च हरेश्चैव नापश्यत्स यदृच्छया ।। ६० ।।

ततः कालेन महता कालधर्ममुपेयिवान् ।
लोकान्तरमनुप्राप्य उलूकं देहमाश्रितः ।। ६१ ।।

सर्वत्र गच्छमानोऽपि भक्ष्यं किंचिन्न चाप्तवान् ।
क्षुधार्तश्च सदा खिन्नो यममाह सुदुःखितः ।। ६२ ।।

क्षुत्पीडा वर्तते देव दुर्गतस्य सदा मम ।
मया पापं कृतं किंवा किं करिष्यामि वै यम ।। ६३ ।।

ततस्तं धर्मराट् प्राह धर्माधर्मप्रदर्शकः ।
त्वया हि सुमहत्पापं कृतमज्ञानतो नृप ।। ६४ ।।

हरिमित्रं प्रति तदा वासुदेवपरायणम् ।
हरिमित्रे कृतं पापं वासुदेवार्चनादिषु ।। ६५ ।।

तेन पापेन संप्राप्तः क्षुद्बोधस्त्वां सदा नृप ।
दानयज्ञादिकं सर्वं प्रनष्टं ते नराधिप ।। ६६ ।।

गीतनाट्यलयोपेतं गायमानं सदा हरिम् ।
हरिमित्रं समाहूय हृतवानसि तद्धनम् ।। ६७ ।।

उपहारादिकं सर्वं वासुदेवस्य सन्निधौ ।
तव भृत्याः समाहृत्य पापं चक्रुस्तवाज्ञया ।। ६८ ।।

हरेः कीर्तिं विना चान्यद्ब्राह्मणेन नृपोत्तम ।
न गेययोगे मंतव्यं तस्मात्पापं त्वया कृतम् ।। ६९ ।।

नष्टं ते स्वर्गलोकाद्यं गच्छ पर्वतकोटरम् ।
पूर्वोत्सृष्टं स्वदेहं ते खाद नित्यं निकृत्य वै ।। ७० ।।

तस्मिन्क्षीणे त्विमं देहं खाद नित्यं क्षुधान्वितः ।
महानिरयसंस्थस्त्वं यावन्मन्वंतरं भवेत् ।। ७१ ।।

मन्वंतरे ततोऽतीते भूम्यां त्वं श्वा भविष्यसि ।
ततः कालेन कियता मानुष्यमनुलप्स्यसे ।। ७२ ।।

एवमुक्त्वा यमो विद्वांस्तत्रैवान्तरधीयत ।
सोऽहं नारद भूपालः पुरेदानीमुलूकताम् ।। ७३ ।।

(उसका) सब धन वग़ैरः हरण करके उसे राज्य से निकाल दिया। उस राजा ने अपनी इच्छा से नारायण की मूर्ति का भी दर्शन नहीं किया ॥ ६० ॥

फिर लम्बे समय के बाद वह काल-धर्म (मृत्यु) को प्राप्त हुआ। लोकान्तर को प्राप्त करके उसने उलूक के देह का आश्रय लिया ॥ ६१ ॥

सर्वत्र जाने पर भी उसे कुछ भी भक्ष्य न मिला। क्षुधा से पीड़ित तथा सदा खिन्न और अतिशय दुःखी होकर उसने यमराज से कहा— ॥६२॥

'हे देव ! हमेशा दुर्गतिवाले मुझे क्षुधा से बड़ी पीड़ा होती है। मैंने ऐसा क्या पाप कर डाला है ? हे यम ! अब मैं क्या करूं ?' ॥ ६३ ॥

तब धर्म और अधर्म को दिखानेवाले धर्मराज बोले— 'हे राजा तुमने, अज्ञानवश बहुत बड़ा पाप किया है ॥ ६४ ॥

वासुदेव-परायण हरिमित्र के प्रति उस समय (तुमने पाप किया है।) वासुदेव के पूजन आदि के बारे में तुमने हरिमित्र के प्रति पाप किया है ॥ ६५ ॥

उस पाप से हे राजा ! तुमको हमेशा क्षुधा का अनुभव होता है। हे नराधिप ! तुम्हारा दान-यज्ञ आदि सब नष्ट हो गया है ॥ ६६ ॥

सदा गीत नाट्ययुक्त हरि का गान करते हुए हरिमित्र को बुलाकर तुमने उसका धन ले लिया था ॥ ६७ ॥

वासुदेव के समीप उपहार वग़ैरः जो कुछ था, उस सारी सामग्री को तुम्हारे सेवकों ने तुम्हारी आज्ञा से छीनकर फेंक देने का पाप किया ॥ ६८ ॥

हे नृपोत्तम ! हरि की कीर्ति के अतिरिक्त ब्राह्मणों को दूसरे किसी गानयोग में प्रवृत्त न होना चाहिए। अतः तुमने पाप किया है ॥ ६९ ॥

तुम्हारे स्वर्गलोकादि नष्ट हो गये हैं। पर्वत की कोटर में जाओ (और) पहले जिसका त्याग किया है, ऐसे (पूर्वजन्म के) शरीर को सदा नोच-नोच के खाते रहो ॥ ७० ॥

उस शरीर के क्षीण होनेपर फिर क्षुधा लगने पर तुम इस शरीर का भक्षण करते रहना। इस प्रकार एक मन्वन्तर तक तुम इस महानरक में निवास करो ॥ ७१ ॥

मन्वन्तर पूरा होने पर तुम पृथ्वी पर कुत्ता बनोगे। बाद में कुछ काल बीतने पर तुम मनुष्यत्व को प्राप्त करोगे' ॥ ७२ ॥

ऐसा कहकर विद्वान् यम वहीं अंतर्धान हो गये। अतः हे नारद ! मैं राजा पहले उलूकता को ॥ ७३ ॥

लब्धवान्कर्मदोषेण हरिमित्रकृतेन वै ।
ततो मानसशैलेऽहं कोटरे ह्यवसं मुने ॥ ७४ ॥
पूर्वो मृतकदेहो मे भक्षणाय ह्युपस्थितः ।
क्षुधान्वितोऽहं तं देहं खादितुं ह्युपचक्रमे ॥ ७५ ॥
तत्क्षणं दैवयोगेन हरिमित्रो महायशाः ।
विमानेनार्कवर्णेन स्तूयमानोऽप्सरोगणैः ॥ ७६ ॥
विष्णुदूतैः परिवृतः पथा तेनागतो नृप ।
विष्णुभक्तो महातेजाः पथि मां दृष्टवान्प्रभुः ॥ ७७ ॥
भुवनेशशरीरंतद्ददर्शोलूकसन्निधौ ।
पृष्टोऽहं तेन दयया शवसन्निधिसंस्थितः ॥ ७८ ॥
भुवनेशस्य नृपतेर्देहोऽयं दृश्यते खग ।
उलूक त्वं च किमि खादितुं चोद्यतो भवान् ॥ ७९ ॥
तच्छ्रुत्वा हरिमित्राय प्रणम्य विनयान्वितः ।
कृतांजलिपुटो भूत्वा बहुमानपुरःसरम् ॥ ८० ॥
तत्सर्वं पूर्ववृत्तान्तं नारदास्मै न्यवेदयम् ।
पुरापराधं त्वयि यत्तस्य पाकोऽयमागतः ॥ ८१ ॥
यावन्मन्वंतरं विप्र खादिष्यामि शवं त्विमम् ।
ततः श्वाहं भविष्यामि भविष्यामि ततो नरः ॥ ८२ ॥
एतदाकर्ण्य करुणो हरिमित्रोमहायशाः ।
कृपया मां समाचष्ट शृणूलूक महीपते ॥ ८३ ॥
मयि त्वयापराधं यत्तत्सर्वं क्षान्तवानहम् ।
शवो ह्यदर्शनं यातु न च श्वा त्वं भविष्यसि ॥ ८४ ॥
त्वामद्य गानयोगश्च प्राप्नोतु मत्प्रसादतः ।
स्तुहि विष्णुं च गानेन जिह्वा स्पष्टा च जायताम् ॥ ८५ ॥
सुरविद्याधराणां च गंधर्वाप्सरसां तथा ।
गानाचार्यो भवेथास्त्वं भक्ष्यभोज्यसमन्वितः ॥ ८६ ॥
ततः कतिपयाहोभिः सर्वं भद्रं भविष्यति ।
हरिमित्रवचस्तच्च विष्णुदूतोपबृंहितम् ॥ ८७ ॥
सर्वं निरयसंज्ञं मे क्षणादेव व्यनाशयत् ।
प्रकृत्या विष्णुभक्तानामीदृशी करुणा द्विज ॥ ८८ ॥

प्राप्त करके हरिमित्र के प्रति किये हुए कर्मद्रोष से हे मुनि, मानसशैल की कोटर में रहने लगा ॥ ७४ ॥

मेरे भक्षण के लिए पूर्व का मृत देह उपस्थित हुआ। क्षुधायुक्त होकर मैंने उस देह को खाना आरम्भ किया ॥ ७५ ॥

उसी क्षण दैवयोग से महायशस्वी हरिमित्र सूर्य के समान प्रकाशमान विमान में स्थित अप्सराओ द्वारा जिसकी स्तुति हो रही थी ॥ ७६ ॥

विष्णु के दूतों से घिरा हुआ उस मार्ग से आये हुए उस महातेजस्वी विष्णुभक्त ने मार्ग में मुझे देखा ॥ ७७ ॥

(उन्होंने) भुवनेश के शरीर को मुझ उलूक के समीप देखा। शव के पास बैठे हुए मुझसे उन्होंने पूछा— ॥ ७८ ॥

'हे पक्षी ! यह राजा भुवनेश का शरीर दिखाई देता है। हे उलूक ! तुम इसे खाने के लिए क्यों तत्पर हो ?' ॥ ७९ ॥

यह सुनकर विनय से हाथ जोड़कर हरिमित्र को प्रणाम करके बहुत संमानपूर्वक ॥ ८० ॥

हे नारदजी ! वह सारा पूर्ववृत्तान्त उनको निवेदन किया और कहा— 'मैंने आपके प्रति पहले जो अपराध किया है, उसी का यह फल प्राप्त हुआ है' ॥ ८१ ॥

हे विप्र ! एक मन्वन्तर तक मैं इस शरीर को खाता रहूँगा, बाद में मैं कुत्ता बनूँगा और फिर मनुष्य बनूँगा' ॥ ८२ ॥

यह सुनकर महायशस्वी दयालु हरिमित्र मुझसे कृपापूर्वक कहने लगे— हे उलूक राजा ! सुनो ॥ ८३ ॥

'तुमने मेरे प्रति जो कुछ अपराध किया है, उन सबको मैं क्षमा कर देता हूँ ! यह शव अदृश्य हो जाय और तुम भी कुत्ता नहीं बनोगे ॥ ८४ ॥

मेरी कृपा से तुमको गानयोग की प्राप्ति हो। गान से विष्णु की स्तुति करो। तुम्हारी जिह्वा स्पष्ट हो जाय ॥ ८५ ॥

देवता, विद्याधर, गंधर्व तथा अप्सराओं के तुम गायनाचार्य हो जाओ ! तथा (अनेक प्रकार के) भक्ष्य-भोज्य पदार्थों से युक्त होओ ॥८६॥

बाद में थोड़े दिनों में ही तुम्हारा सब कुछ कल्याण होगा।' हरिमित्र के इस वचन का विष्णुदूतों द्वारा समर्थन किया गया ॥ ८७ ॥

मेरी नरक की सारी सामग्री क्षण मात्र में नष्ट हो गई। हे द्विज ! विष्णुभक्तों में स्वभाव से ही इस प्रकार की करुणा होती है ॥ ८८ ॥

कृतापराधलोकानामपि दुःखं व्यपोहति ।
अमृतस्यन्दि वचनमुक्त्वा स प्रययौ हरिम् ॥ ८९ ॥
सर्वं ते कथितं येन गानाचार्योहमुत्तमः ।
प्राप्स्यामि हरिमेतेन हरिमित्रप्रसादतः ॥ ९० ॥
नारदैतदनुवर्णितं मयापूर्वजन्म चरितं महाद्भुतम् ।
यः शृणोति हरिमेत्य चेतसा स प्रयाति भवनं गदाभृतः ॥९१॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अद्भुतोत्तरकाण्डे
आदिकाव्ये हरिमित्रोपाख्यानं
नाम षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः

गानबंधुः पुनः प्राह नारदं मुनिसत्तमम् ।
एते किन्नरसंघा वै विद्याध्राप्सरसां गणाः ॥ १ ॥
गानाचार्यमुलूकं मां गानशिक्षार्थमागताः ।
तपसा नैव शक्त्या वा गानविद्या तपोधन ॥ २ ॥
तस्माच्छ्मेण युक्तश्च मत्तस्त्वं गानमाप्नुहि ।
एवमुक्तो मुनिस्तस्मै प्रणिपत्य जगौ यथा ॥ ३ ॥
तच्छृणुष्व मुनिश्रेष्ठ वासुदेवं नमस्य च ।
उलूकेनैवमुक्तस्तु नारदो मुनिसत्तमः ॥ ४ ॥
शिक्षाक्रमेण संयुक्तस्तत्र गानमशिक्षत ।
गानबंधुस्तमाहेदं त्यक्तलज्जो भवाधुना ॥ ५ ॥
स्त्रीसंगमे तथा गीते श्रुतेऽन्वाख्यानसंगमे ।
व्यवहारे च धान्यानामर्थानां च तथैव च ॥ ६ ॥
आयेव्यये तथा नित्यं त्यक्तलज्जस्तु वै भवेत् ।
न कुण्ठितेन गूढेन नित्यं प्रावरणादिभिः ॥ ७ ॥
हस्तविक्षेपभावेन व्यादितास्येन चैव हि ।
निर्यातजिह्वायोगेन न गेयं च कथंचन ॥ ८ ॥
स्वांगं निरीक्षमाणेन परमप्रेक्षता तथा ।
न गायेदूर्ध्वबाहुश्च नोर्ध्वदृष्टिः कथंचन ॥ ९ ॥

(वे) अपराधी लोगों के दुःख भी दूर करते हैं। (इस प्रकार) अमृतपूर्ण वचन कहकर वे विष्णु के पास गये ॥ ८९ ॥

जिससे मैं उत्तम गायनाचार्य बना हूँ, वह सब मैंने कह दिया। इसी के फलस्वरूप हरिमित्र के प्रसाद से मैं विष्णु को भी प्राप्त करूँगा ॥ ९० ॥

हे नारद ! मैंने अपने अति अद्भुत पूर्वजन्म के चरित्र का वर्णन किया है। जो इसे ध्यानपूर्वक सुनते हैं, वे गदा धारण करनेवाले (नारायण) के भवन को प्रयाण करते हैं ॥ ९१ ॥

॥ इति श्री वाल्मीकिविरचित आदिकाव्य रामायण के
अद्भुतोत्तर-काण्ड में हरिमित्रोपाख्यान नाम
षष्ठ सर्ग समाप्त ॥ ६ ॥

सप्तम सर्ग

नारदजी को गानविद्या की प्राप्ति

मुनिश्रेष्ठ नारदजी से फिर (से) कहने लगे— "ये किन्नरों के संघ तथा विद्याधर एवं अप्सराओं के गण ॥ १ ॥

गानाचार्य (मुझ) उलूक के पास गानविद्या की शिक्षा के लिए आये थे। हे तपोधन ! गानविद्या तप से या शक्ति से नहीं आती ॥ २ ॥

अतः श्रम करके तुम मुझसे गानविद्या प्राप्त करो।" इस प्रकार कहे जाने पर मुनि उससे प्रणाम करके (जिस प्रकार) गाने लगे, ॥ ३ ॥

हे मुनि ! वह सुनो। वासुदेव को नमस्कार करके उलूक के इस प्रकार के वचन सुन मुनिश्रेष्ठ नारद ॥ ४ ॥

शिक्षाक्रम से संयुक्त होकर वहाँ गान सीखने लगे। तब गानबन्धु ने (उनसे) कहा— "अब लज्जा का त्याग कर दो ॥ ५ ॥

स्त्री-संगम में, गीत में, छींक आने पर, अन्वाख्यान प्रसंग में, धान्य तथा अर्थ के व्यवहार में, ॥ ६ ॥

आय तथा व्यय में हमेशा लज्जा छोड़ देनी चाहिए। कुण्ठित मन से, मूक भाव से अथवा प्रावरण आदि से ढके हुए (मुँह से) ॥ ७ ॥

हाथ फैलाकर या सिकोड़कर, मुँह बहुत फैलाकर, जिह्वा भींचकर कभी गाना नहीं चाहिए ॥ ८ ॥

किसी दूसरे की ओर देखे बिना, अपने अंग का निरीक्षण करते हुए, मुख झुकाकर या ऊपर की ओर दृष्टि करके कभी गाना नहीं चाहिए ॥ ९ ॥

हासो भयं क्षुधा कंपः शोकोन्यस्य स्मृतिस्तृषा ।
नैतानि सप्तरूपाणि गानयोगे महामते ॥ १० ॥

नैकहस्तेन शस्येत तालसंघट्टनं मुने ।
क्षुधार्तेन भयार्तेन तृषार्तेन तथैव च ॥ ११ ॥

गानयोगो न कर्तव्यो नांधकारे कथंचन ।
एवमादीनि योग्यानि कर्तव्यानि महामुने ॥ १२ ॥

एवमुक्तः स भगवान्नारदो विधिरक्षणे ।
अशिक्षत तथा गीतं दिव्यवर्षसहस्रकम् ॥ १३ ॥

ततः समस्तसंपन्नो गीतप्रस्तावकादिषु ।
विपंच्यादिषु संपन्नः सर्वस्वरविभागवित् ॥ १४ ॥

अयुतानि च षट्त्रिंशत्सहस्राणि शतानि च ।
स्वराणां भेदयोगेन ज्ञातवान्मुनिसत्तमः ॥ १५ ॥

ततो गंधर्वसंघाश्च किन्नराणां तथा गणाः ।
मुनिना सह संयुक्ताः प्रीतियुक्तास्तु तेऽभवन् ॥ १६ ॥

गानबंधुं मुनिः प्राह प्राप्य गानमनुत्तमम् ।
त्वां समासाद्य संपन्नं त्वं हि गीतविशारदाः ॥ १७ ॥

ध्वांक्षशत्रो महाप्राज्ञ किमवाप्यं करोमि ते ।
गानबंधुस्ततः प्राह नारदं मुनि पुंगवम् ॥ १८ ॥

ब्रह्मणो दिवसे ब्रह्मन्मनवः स्युश्चतुर्दश ।
ततस्त्रैलोक्यसंप्लावो भविष्यति महामुने ॥ १९ ॥

तावन्मे स्याद्यशोभागस्तावन्मे परमं शुभम् ।
मनसाध्यापितं मे स्याद्दाक्षिण्यान्मुनिसत्तमः ॥ २० ॥

उलूकं प्राह देवर्षिः सर्वं तेऽस्तु मनोगतम् ।
अतीते कल्पसंयोगे गरुडस्त्वं भविष्यसि ॥ २१ ॥

गुणगानादच्युतस्य सायुज्यं तस्य लप्स्यसे ।
स्वस्ति तेस्तु महाप्राज्ञ गमिष्यामि प्रसीद मे ॥ २२ ॥

एवमुक्त्वा ययौ विप्रो जेतुं तुंबुरुमुत्तमम् ।
तुंबुरोश्च गृहाभ्याशे ददर्श विकृताकृतीन् ॥ २३ ॥

हे महामति ! गानयोग में हास्य, भय, क्षुधा, कंप, शोक, किसी दूसरे की स्मृति और प्यास —ये सात नहीं होने चाहिए ॥ १० ॥

हे मुनि ! एक हाथ से ताल देकर गाना उचित नहीं (माना जाता) । उसी प्रकार भूख-प्यास तथा भय से व्याकुल मनुष्य को ॥ ११ ॥

गान नहीं करना चाहिए। तथा अंधकार में तो कभी भी गाना उचित नहीं है। हे महामुनि ! ये सब (गान के बारे में) योग्य कर्तव्य हैं" ॥ १२ ॥

नारदजी को (गानविद्या की) विधि- रक्षा के संबंध में इस प्रकार प्रशिक्षित किया गया और बाद में वे (भगवान नारद) सहस्र दिव्य वर्षों तक गानविद्या सीखते रहे ॥ १३ ॥

तब गीत की प्रस्तावना आदि के संबंध में समग्र (विद्या का) संपादन करके वीणा आदि (बजाने) में नारद संपन्न हुए तथा सर्व स्वरों के विभाग को (उन्होंने) जान लिया ॥ १४ ॥

४६००० हज़ार स्वर-भेदों का ज्ञान भी उस मुनिश्रेष्ठ नारद ने प्राप्त कर लिया ॥ १५ ॥

तब गंधर्वों के संघ तथा किन्नरों के गण मुनि का संपर्क प्राप्त होने से प्रसन्न हुए ॥ १६ ॥

श्रेष्ठ गान (विद्या) को प्राप्त करके मुनि ने गानबंधु से कहा, "तुमको मिलकर (गानविद्या से) मैं संपन्न हुआ हूँ। तुम सचमुच बड़े गान-विशारद हो ! ॥ १७ ॥

हे महाबुद्धिशाली उलूक (कौओं के शत्रु) ! मैं तुम्हारा क्या प्रिय करूँ ?" तब गानबंधु ने नारद मुनि से कहा— ॥ १८ ॥

"हे ब्रह्मन् ! ब्रह्मा के एक दिन में चौदह मनु होंगे। बाद में हे महामुने ! तीनों लोक का नाश होगा ॥ १९ ॥

तब तक मेरा यश बना रहे, मेरा परम कल्याण हो। हे मुनि-उत्तम ! आपकी कृपा से मुझे मन से ही शिक्षा की प्राप्ति हो" ॥ २० ॥

देवर्षि ने उलूक से कहा— "तुम्हारी सारी मनोकामनाएँ पूर्ण हों ! एक कल्प बीतने पर तुम गरुड़ बनोगे ॥ २१ ॥

विष्णु के गुणगान से तुम (उनके) सायुज्य को प्राप्त करोगे। हे महाप्राज्ञ ! तुम्हारा कल्याण हो ! मैं जाता हूँ। मुझ पर प्रसन्न होइए" ॥ २२ ॥

ऐसा कहकर विप्र (नारदजी) तुंबुरु को जीतने के लिए चल पड़े। तुंबुरु के घर के पास उन्होंने विकृत आकृति वाले (लोग) देखे ॥ २३ ॥

कृत्तबाहूरुपादांश्च कृत्तनासाक्षिवक्षसः ।
कृतोत्तमांगांगुलींश्च छिन्नभिन्नकलेवरान् ॥ २४ ॥

पुंसः स्त्रियश्च विकृतान्ददर्शायुतशो बहून् ।
नारदेन च ते प्रोक्ताः के यूयं कृतविग्रहाः ॥ २५ ॥

नारदं प्रोचुरपि ते त्वया कृतांगका वयम् ।
वयं रागाश्च रागिण्यो गानेन भिन्नसंधिना ॥ २६ ॥

भवता गीयते यर्हि तर्ह्यवस्थेदृशी हि नः ।
पुनस्तुंबुरुगानेन च्छिन्नभिन्नप्ररोहणम् ॥ २७ ॥

तुंबुरुर्जीवयत्येष त्वं मारयसि नारद ।
तदाश्चर्यं महद्दृष्ट्वा श्रुत्वा च विस्मयान्वितः ॥ २८ ॥

धिग्धिगुक्त्वा जगामाथ नारदोऽपि जनार्दनम् ।
श्वेतद्वीपे स भगवान्नारदं प्राह माधवः ॥ २९ ॥

गानबंधौ च यद्गानं न चैतेनासि पारगः ।
तुंबुरोः सदृशो नासि गानेनानेन नारद ॥ ३० ॥

मनोर्वैवस्वतस्याहमष्टाविंशतितमे युगे ।
द्वापरांते भविष्यामि यदुवंशकुलोद्भवः ॥ ३१ ॥

देवक्यां वसुदेवस्य कृष्णनाम्ना महामुने ।
तदानीं मां समागम्य स्मारयैतद्यथातथम् ॥ ३२ ॥

तत्र त्वां गानसम्पन्नं करिष्यामि महाव्रत ।
तुंबुरोश्च समं चैव तथातिशयसंयुतम् ॥ ३३ ॥

तावत्कालं यथायोगं देवगंधर्वयोनिषु ।
शिक्ष त्वं हि यथान्यायमित्युक्त्वांतरधीयत ॥ ३४ ॥

ततो मुनिः प्रणम्यैनं वीणावादन तत्परः ।
देवर्षिर्देवसंकाशः सर्वाभरणभूषितः ॥ ३५ ॥

तपसां निधिरत्यर्थं वासुदेवपरायणः ।
स्कंधे विपंचीमाधाय सर्वलोकांश्चचार सः ॥ ३६ ॥

वारुणं याम्यमाग्नेयमैंद्रं कौबेरमेव च ।
वायव्यं च तथैशानं संशयं प्राप्य धर्मवित् ॥ ३७ ॥

कटे हुए हाथ, जंघा और पैर वाले, कटी हुई नाक, आँख एवं वक्षःस्थल वाले, कटे हुए मस्तक तथा उँगलियों वाले और छिन्न-भिन्न शरीर वाले ॥ २४ ॥

हजारों विकलांग स्त्री-पुरुषों को नारद ने देखा। नारद ने उनसे पूछा— "कटे शरीर वालो ! तुम सब कौन हो ?" ॥ २५ ॥

उन्होंने भी नारद से कहा— "आपके द्वारा काटे गये अंगवाले हम सब (विविध) राग-(एवं) रागिणियाँ हैं ! जब भिन्न सन्धान से ॥ २६ ॥

आप गाते हैं, तब हमारी यह दशा हो जाती है। फिर तुंबुरु अपने गान से हमारे छिन्न-भिन्न शरीर (को) ॥ २७ ॥

जीवित करते हैं (और) हे नारद ! तुम मारते हो।" उस महद् आश्चर्य को देखकर और सुनकर विस्मयान्वित होकर ॥ २८ ॥

'धिक्कार है, धिक्कार है !' ऐसा कहकर नारद भी जनार्दन (नारायण) के पास गये। श्वेतद्वीप में भगवान माधव ने नारद से कहा— ॥ २९ ॥

"गानबंधु में जो गानविद्या है, उसे प्राप्त कर तुम इस विषय में पारंगत नहीं हुए हो ! इस गान से हे नारद ! तुम तुंबुरु के समकक्ष योग्यता प्राप्त नहीं कर पाये हो ॥ ३० ॥

वैवस्वत मनु के अट्ठाइसवें युग में द्वापर के अंत में यदुवंश में मैं अवतार लूँगा ॥ ३१ ॥

हे महामुने ! वसुदेवजी का देवकी से कृष्ण नामक पुत्र बनूँगा, उस समय मेरे पास आकर तुम मुझे इस बात का यथातथ्य स्मरण कराना ॥ ३२ ॥

तब हे महाव्रती ! मैं तुम्हें गानविद्या से संपन्न कर दूँगा। तुंबुरु के समान तथा उससे भी अधिक कुशल बना दूँगा ॥ ३३ ॥

तब तक यथायोग्य देव-गंधर्वों की योनियों में तुम इसकी योग्य रूप से शिक्षा ग्रहण करो।" ऐसा कहकर भगवान अन्तर्धान हो गये ॥ ३४ ॥

तब उन्हें प्रणाम करके वीणावादन के लिए तत्पर देव-समान सर्व आभूषणों से आभूषित देवर्षि ॥ ३५ ॥

तपोनिधि अत्यन्त वासुदेवपरायण कंधे पर वीणा धारण किये सब लोकों में विचरण करने लगे ॥ ३६ ॥

वरुण, यम, अग्नि, इन्द्र तथा कुबेर की (दिशाओं में) तथा वायव्य और ईशान दिशा में द्विधाग्रस्त होते हुए यह धर्मवेत्ता ॥ ३७ ॥

गायमानो हरिं सम्यग्वीणावादविचक्षणः ।
गंधर्वाप्सरसां संघैः पूज्यमानस्ततस्ततः ॥ ३८ ॥
ब्रह्मलोकं समासाद्य कस्मिंश्चित्कालपर्यये ।
हाहा हूहूश्च गंधर्वौ गीतवाद्यविशारदौ ॥ ३९ ॥
ब्रह्मणो गायकौ दिव्यौ नित्यं गंधर्वसत्तमौ ।
तत्र ताभ्यां समासाद्य गायमानौ हरिं विभुम् ॥ ४० ॥
ब्रह्मणा च महातेजाः पूजितो मुनिसत्तमः ।
तं प्रणम्य महात्मानं सर्वलोकपितामहम् ॥ ४१ ॥
चचार च यथाकामं सर्वलोकेषु नारदः ।
पुनः कालेन महता गृहं प्राप्य च तुम्बुरोः ॥ ४२ ॥
वीणामादाय तत्रस्थस्तत्रस्थैरप्यलक्षितः ।
सुरकन्याश्च तत्रस्थाः षड्जाद्याः सहधैवताः ॥ ४३ ॥
व्रीडितो भगवान्दृष्ट्वा निर्गतश्च स सत्वरम् ।
शिक्षयामास बहुशस्तत्र तत्र महामुनिः ॥ ४४ ॥
कालेऽतीते ततो विष्णुरवतीर्णो जगन्मयः ।
देवक्यां वसुदेवस्य यादवोऽसौ महाद्युतिः ॥ ४५ ॥
सप्तस्वराङ्गना दृष्टुं गानविद्याविशारदः ।
ययौ रैवतके कृष्णं प्रणिपत्य महामुनिः ॥ ४६ ॥
व्यज्ञापयदशेषं तच्छ्वेतद्वीपे त्वया पुरा ।
नारायणेन कथितं गानयोगार्थमुत्तमम् ॥ ४७ ॥
तच्छ्रुत्वा प्रहसन्कृष्णः प्राह जांबवतीं मुदा ।
एनं मुनिवरं भद्रे शिक्षयस्व यथाविधि ॥ ४८ ॥
वीणागानसमायोगे तथेत्याह च सा पतिम् ।
प्रहसंती यथायोगं शिक्षयामास तं मुनिम् ॥ ४९ ॥
ततः संवत्सरे पूर्णे नारदं प्राह केशवः ।
सत्यासमीपमागच्छ शिक्षस्व तथा पुनः ॥ ५० ॥
तथेत्युक्त्वा सत्यभामां प्रणिपत्य ययौ मुनिः ।
तया स शिक्षितो विद्वान्पूर्णे संवत्सरे ततः ॥ ५१ ॥
वासुदेवनियुक्तोऽसौ रुक्मिण्याः सदनं गतः ।
अंगनाभिस्तत्रत्याभिर्दासीभिर्गुनिसत्तमः ॥ ५२ ॥

वीणा बजाने में चतुर, हरि का सम्यक् गान करते हुए सर्वत्र गंधर्व एवं अप्सराओं के गुणों से पूजित ॥ ३८ ॥

कुछ काल बीतने पर ब्रह्मलोक को प्राप्त हुए। (वहाँ) गीत-वाद्य में निपुण 'हाहा' और 'हूहू' नामक दो दिव्य गंधर्व ॥ ३९ ॥

ब्रह्मा के गायक थे। वहाँ उनके साथ मिलकर भगवान विष्णु का गान करते हुए ॥ ४० ॥

महातेजस्वी मुनिश्रेष्ठ ब्रह्मा से पूजित हुए। सर्वलोक के पितामह ऐसे उन महात्मा को प्रणाम करके ॥ ४१ ॥

नारदजी सर्वलोक में यथेच्छ भ्रमण करने लगे। बहुत समय के बाद फिर से तुंबुरु के घर को प्राप्त करके ॥ ४२ ॥

वीणा लेकर वहाँ रहनेवालों से भी अलक्षित होकर वहीं रहने लगे। धैवत-सहित षड्ज आदि सुरकन्याएँ भी वहाँ रह रही थीं ॥ ४३ ॥

(उन्हें) देख भगवान नारद लज्जित हो गये और वहाँ से शीघ्र ही चले गये। महामुनि ने अनेक स्थानों पर विविध प्रकार से शिक्षा दी ॥ ४४ ॥

समय बीतने पर जगत्प्रभु विष्णु ने अवतार लिया। वसुदेव के वंश में देवकी की कोख से उस महातेजस्वी यादव ने जन्म लिया ॥ ४५ ॥

गानविद्या-विशारद (नारदजी) सात स्वरांगनाओं को देखने के लिए रैवतक पर्वत पर गये। (वहाँ) महामुनि (नारदजी) ने श्रीकृष्ण को प्रणाम करके ॥ ४६ ॥

संपूर्ण (वृत्तान्त का) निवेदन किया कि पहले श्वेतद्वीप में आपने नारायण रूप से उत्तम गानयोग की प्राप्ति कराने के लिए कहा था ॥ ४७ ॥

यह सुन हँसते हुए श्रीकृष्ण ने जांबवती से प्रीतिपूर्वक कहा— "हे भद्रे ! इस मुनिवर्य को विधिपूर्वक सिखाओ" ॥ ४८ ॥

'वीणागान का योग सिखाऊँ ? ठीक है' —ऐसा जांबवती ने पति से कहा और हँसते-हँसते उस मुनि को यथायोग्य शिक्षा दी ॥ ४९ ॥

बाद में एक वर्ष पूर्ण होने पर केशव ने नारद से कहा— "अब सत्या के पास जाओ ! और फिर से सीखो !" मुनि ने सत्यभामा के पास जाकर प्रणाम किया ॥ ५० ॥

"बहुत अच्छा" कहकर प्रणाम करके मुनि सत्यभामा के पास गये। उसने भी इस विद्वान् को शिक्षा दी। तब वर्ष पूर्ण होने पर ॥ ५१ ॥

कृष्ण की आज्ञा से वह (नारदजी) रुक्मिणी के भवन में गये। वहाँ की अनेक सुंदर स्त्रियों ने तथा दासियों ने ॥ ५२ ॥

उक्तोऽसौ गायमानोऽपि न स्वरं वेत्सि वै मुने ।
ततः श्रमेण महता यावत्संवत्सरद्वयम् ॥ ५३ ॥
शिक्षितोऽसौ तदा देव्या रुक्मिण्याधिजगौ मुनिः ।
न तु स्वरांगनाः प्राप तंत्रीयोगे महामुनिः ॥ ५४ ॥
आहूय कृष्णो भगवान्स्वयमेव महामुनिम् ।
अशिक्षयदमेयात्मा गानयोगमनुत्तमम् ॥ ५५ ॥
कृष्णदत्तेन गानेन तस्यायाताः स्वरांगनाः ।
ब्रह्मानंदः समभवन्नारदस्य च चेतसि ॥ ५६ ॥
ततो द्वेषादयो दोषाः सर्वे अस्तं गता द्विज ।
ईर्ष्या च तुंबुरौ यासीन्नारदस्य च सा गता ॥ ५७ ॥
ततो ननर्त देवर्षिः प्रणिपत्य जनार्दनम् ।
उवाच च हृषीकेशः सर्वज्ञस्त्वं महामुने ॥ ५८ ॥
प्राचीनगानयोगेन गायस्व मम सन्निधौ ।
एतत्ते प्रार्थितं प्राप्तं मम लोके तथैव च ॥ ५९ ॥
नित्यं तुम्बुरुणा सार्द्धं गायस्व च यथातथम् ।
एवमुक्तो मुनिस्तत्र यथायोगं चचार सः ॥ ६० ॥
तथा संपूजयत्कृष्णं रुद्रं भुवननायकम् ।
तदा जगौ हरेस्तत्र नियोगाच्छंकरालये ॥ ६१ ॥
रुक्मिण्या सत्यया सार्द्धं जांबवत्या महामुनिः ।
कृष्णेन च द्विजश्रेष्ठ श्रुतिजातिविशारदः ॥ ६२ ॥
एवं ते मुनिशार्दूल प्रोक्तो गीतक्रमो मया ।
ब्राह्मणो वासुदेवाख्यं गायमानोऽनिशं द्विज ॥ ६३ ॥
हरेः सायुज्यमाप्नोति सर्वयज्ञफलं लभेत् ।
अन्यथा नरकं गच्छेद्गायमानोऽन्यदेव हि ॥ ६४ ॥
कर्मणा मनसा वाचा वासुदेवपरायणः ।
गायञ्छृण्वंस्तमाप्नोति तस्माच्छ्रेष्ठः प्रियंवदः ॥ ६५ ॥
कथितमिदमपूर्वं जानकीजन्मपूर्वं
श्रुतिसुखमतिगुह्यं स्नेहतस्तेऽतिराह्यम् ।
कलुषकुलविपक्षं भव्यदानैकदक्षं
नृभिरविरतवंद्यं सर्वदेवाभिरामम् ॥ ६६ ॥

उनको कहा— "हे मुनि, गाने पर भी तुम स्वर को नहीं जानते हो !" बाद में बहुत परिश्रम से दो वर्ष तक ।। ५३ ।।

देवी रुक्मिणी से शिक्षा प्राप्त कर मुनि गाने लगे । किन्तु महामुनि तंत्रीयोग में स्वरांगनाओं के समकक्ष योग्यता प्राप्त न कर सके ।। ५४ ।।

तब अप्रमेय आत्मस्वरूप श्रीकृष्ण भगवान ने स्वयं महामुनि को बुलाकर श्रेष्ठ गानयोग की शिक्षा दी ।। ५५ ।।

श्रीकृष्ण के द्वारा दी गई गानविद्या से उन (नारदजी) को स्वरांगना प्राप्त हुई । और नारद के चित्त में ब्रह्मानंद का स्फुरण हुआ ।। ५६ ।।

तब हे द्विज ! (नारदजी के) द्वेष वग़ैरह सारे दोष अस्त हो गये । तथा नारदजी की तुंबुरु के प्रति जो ईर्ष्या थी, वह दूर हो गई ।। ५७ ।।

तब देवर्षि नारायण को प्रणाम करके नाचने लगे और श्रीकृष्ण ने कहा— "हे महामुनि ! (अब) तुम सर्वज्ञ हो गये ।। ५८ ।।

मेरे निकट तुम प्राचीन गानयोग से गाओ ! तुम्हारी यह विनती (मेरे द्वारा) पूर्ण हुई है । उसी प्रकार मेरे लोक में ।। ५९ ।।

हमेशा तुंबुरु के साथ यथायोग्य गान करो ।" इस प्रकार कहने पर मुनि यथायोग्य संचरण करने लगे ।। ६० ।।

तथा भुवन के नायक श्रीकृष्ण का पूजन किया । बाद में विष्णु की आज्ञा से शंकर के स्थान में जाकर गाने लगे ।। ६१ ।।

रुक्मिणी, सत्यभामा, जांबवती तथा कृष्ण के साथ स्वर तथा राग में निपुण द्विजश्रेष्ठ गाने लगे ।। ६२ ।।

हे मुनिश्रेष्ठ ! मैंने इस गीतक्रम का आपसे वर्णन किया । हे द्विज ! वासुदेव के नाम को अहर्निश गाता हुआ ब्राह्मण ।। ६३ ।।

हरि का सायुज्य प्राप्त करता है । तथा सर्व यज्ञों का फल पाता है । दूसरे (की कीर्ति) का गान करनेवाला नरक में जाता है ।। ६४ ।।

मन, वचन और कर्म से वासुदेवपरायण होकर गानेवाला और श्रवण करनेवाला उनको प्राप्त करता है । इससे वह प्रियभाषी और श्रेष्ठ माना जाता है ।। ६५ ।।

इस अपूर्व, कर्णप्रिय गूढ़ जानकी-जन्म की पूर्व-कथा मैंने आपसे स्नेह-पूर्वक कही है । यह पापों के समूह का नाश करनेवाली, कल्याण करने में एक मात्र चतुर, मनुष्यों के लिए वन्दनीय तथा सर्व देवताओं के लिए अभिनन्दनीय है ।। ६६ ।।

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अद्भुतोत्तरकांडे नारदगानप्राप्तिर्नाम
सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः

यथा सा शोणितोद्भूता राक्षसीगर्भसंभवा ।
यथा भूमितलोत्पन्ना जानकी च यथा हि सा ॥ १ ॥

सीता तत्छृणु विप्रेन्द्र वर्णयामि तवानघ ।
दशास्यो रावणो नाम तपस्तप्तुं मनो दधे ॥ २ ॥

त्रैलोक्यस्याधिपत्याय अजरामरणाय च ।
बहुवर्षं तपस्तप्त्वा ज्वलनार्कसमोऽज्ज्वलत् ॥ ३ ॥

तत्तेजसा जगत्सर्वं दह्यमानं यदाभवत् ।
तमुवाच तदा ब्रह्मा समागत्य सुरैर्वृतः ॥ ४ ॥

पौलस्त्य विरमाद्य त्वं तपसो मम वाक्यतः ।
तपसोग्रेण महता लोका भस्मीकृता इव ॥ ५ ॥

वरं ददामि ते वत्स यत्ते मनसि वर्तते ।
तपोधन लभस्वाद्य वरदान्मत्त ईप्सितम् ॥ ६ ॥

न्यवारयत चक्षूंषि सूर्यबिंबावलोकनात् ।
प्रणिप्रत्य जगन्नाथं वरं वव्रे स रावणः ॥ ७ ॥

देहि सर्वामरत्वं मे वरदोऽसि यदि प्रभुः ।
तदाकर्ण्य वचो ब्रह्मा पुनः प्राह स रावणम् ॥ ८ ॥

नहि सर्वामरत्वं ते वरमन्यं वृणीष्व मे ।
ततः स रावणः प्राह कूटवादी हि राक्षसः ॥ ९ ॥

न सुरा नासुरा यक्षाः पिशाचोरगराक्षसाः ।
विद्याधराः किन्नरा वा तथैवाप्सरसां गणाः ॥ १० ॥

न हन्युर्मां कथंचित्ते देहि मे वरमुत्तमम् ।
अन्यच्च ते वृणे ब्रह्मंस्तच्छृणुष्व पितामह ॥ ११ ॥

॥ इति श्री वाल्मीकिविरचित रामायण के अद्भुतोत्तर-
काण्ड में नारदगानप्राप्ति नाम
सप्तम सर्ग समाप्त ॥ ७ ॥

अष्टम सर्ग

सीताजी का जन्म

अब जिस प्रकार वे (लक्ष्मीजी) रुधिर में से राक्षसी के गर्भ में प्रविष्ट होकर (तथा) पुनः भूमितल से प्रगट हुईं और जनक की पुत्री के रूप में (प्रसिद्ध) हुईं, वह कथा सुनिए ॥ १ ॥

सीता के जन्म की घटना सुनिए। हे निष्पाप विप्रेन्द्र ! मैं आप से वर्णन करता हूँ ! दशमुख रावण ने तप करने की इच्छा की ॥ २ ॥

तीनों लोकों के आधिपत्य के लिए तथा अजर-अमर होने के लिए बहुत वर्षों तक तप करके वह अग्नि और सूर्य के समान प्रज्वलित होने लगा ॥ ३ ॥

जब उसके तेज से समग्र जगत जलने लगा तब देवताओं के साथ ब्रह्माजी ने आकर उससे कहा— ॥ ४ ॥

"हे पौलस्त्य ! मेरे कहने से अब तुम तप से विराम करो ! इस महान् उग्र तप से सारे लोक मानो भस्मीकृत-से हो गये हैं ॥ ५ ॥

हे वत्स ! तेरे मन में जो हो सो वर मैं देता हूँ। हे तपोधन ! मुझ वरदाता से आज तुम अपना जो भी अभीप्सित हो, उसे प्राप्त करो ॥ ६ ॥

अब तुम सूर्यबिंब के अवलोकन से नेत्रों को हटा लो।" (तब) जगत के स्वामी (ब्रह्माजी) को प्रणाम करके रावण ने वर माँगा— ॥ ७ ॥

"हे प्रभु ! यदि आप वरदान देनेवाले हैं तो मुझे संपूर्ण अमरत्व दीजिए।" यह वचन सुनकर ब्रह्माजी ने फिर से रावण को कहा— ॥ ८ ॥

"संपूर्ण अमरत्व तुझे नहीं मिल सकता। मुझसे कोई दूसरा वरदान माँग ले।" तब यह कूटवादी राक्षस बोला— ॥ ९ ॥

"सुर, असुर, यक्ष, पिशाच, नाग, राक्षस, विद्याधर, किन्नर तथा अप्सराओं के गण ॥ १० ॥

कोई भी मुझे किसी प्रकार न मार सकें, यह उत्तम वरदान मुझे दीजिए। हे ब्रह्मन् ! पितामह ! मैं दूसरा भी एक वरदान आपसे माँगता हूँ, (वह) सुनिए ॥ ११ ॥

आत्मनो दुहिता मोहादत्यर्थं प्रार्थिता भवेत् ।
तदा मृत्युर्मम भवेद्यदि कन्या न कांक्षति ।। १२ ।।

तथेत्युक्त्वा जगामाशु ब्रह्मा लोकपितामहः ।
नरान्नाजीगणद्रक्षो मत्वा तांस्तृणवद्द्विज ।। १३ ।।

ब्रह्मदत्तवरो राजा रावणोवरदर्पितः ।
त्रैलोक्यजयसर्वस्वं प्राप्तवान्बाहुवीर्यतः ।। १४ ।।

एकदा रावणो राजा दंडकारण्यमागतः ।
तत्रर्षीनग्निकल्पांश्च दृष्ट्वा मनस्यचिंतयत् ।। १५ ।।

एतानजित्वा हि कथं त्रिलोकीजयभागहम् ।
एषां वधेन च श्रेयो न पश्यामि महात्मनाम् ।। १६ ।।

दुरात्मा स विचिंत्यैतत्प्राह तान्मुनिपुंगवान् ।
अहं सर्वस्य जगतः शास्ता च जयभागहम् ।। १७ ।।

भवतां जयमाकांक्षे जयं दत्त द्विजर्षभाः ।
इत्युक्त्वा स शराग्रेण क्षताच्छोणितमंगतः ।। १८ ।।

बलादाकृष्य तेषां वै कलशेऽस्थापयत्प्रभुः ।
तत्र गृत्समदो नाम शतपुत्रपिता द्विजः ।। १९ ।।

दुहित्रर्थे भार्यया स प्रार्थितो भगवान् मुनिः ।
लक्ष्मीर्मे दुहिता भूयादित्यसौ कलशे विभुः ।। २० ।।

दुग्धं चाहरहस्तत्र कुशाग्रेण समंत्रतः ।
स्थापयत्येष नियतस्तदर्हर्निर्ययौ वनम् ।। २१ ।।

तद्दिने दैवयोगेन कलशे तत्र रावणः ।
मुनिनां शोणितं स्थाप्य गृहीत्वा स्वगृहं ययौ ।। २२ ।।

भार्यां मंदोदरीं प्राह कलशं रक्ष सुंदरि ।
विषादप्यधिकं विद्धि शोणितं कलशे स्थितम् ।। २३ ।।

न देयं नापि वा भक्ष्यं मुनीनां शोणितं त्विदम् ।
त्रैलोक्यजयलाभेन रावणो लोकरावणः ।। २४ ।।

देवदानवयक्षाणां गंधर्वाणां च कन्यकाः ।
आहृत्य रमयामास मंदरे सह्यपर्वते ।। २५ ।।

मोह से जब मैं अपनी पुत्री की आकांक्षा करने लगूं और यदि कन्या की इच्छा न हो तो उस समय मेरी मृत्यु हो जाए" ॥ १२ ॥

"तथास्तु" कहकर लोक-पितामह ब्रह्माजी शीघ्र अपने लोक में चले गये। हे द्विज ! मनुष्यों को तृण के समान मानकर राक्षस ने उनकी कोई गणना नहीं की ॥ १३ ॥

ब्रह्माजी ने जिसे वर दिया था, उस राजा रावण ने वरदान से दर्प-युक्त होकर (अपने) बाहुबल से तीनों लोकों पर संपूर्ण रूप से विजय प्राप्त की ॥ १४ ॥

एक बार राजा रावण दंडकारण्य में गया। वहाँ अग्नि के समान तेजस्वी ऋषियों को देखकर उसने मन ही मन सोचा— ॥ १५ ॥

इनको बिना जीते मैं त्रिलोकी को जीत लेनेवाला हो ही कैसे सकता हूँ ? और इन महात्माओं का वध करके मैं अपना कल्याण करूँ यह भी संभव नहीं दिखता ॥ १६ ॥

ऐसा सोचकर उस दुरात्मा ने मुनिश्रेष्ठों से कहा— "मैं समग्र जगत का शासक और (उस पर) जय प्राप्त करनेवाला हूँ ॥ १७ ॥

मैं आपको जीतने की इच्छा रखता हूँ। हे द्विजश्रेष्ठो ! मुझे जय दीजिए।" ऐसा कहकर बाण की नोक से (उन्हें) घायल करके उनके शरीर से रुधिर ॥ १८ ॥

बलपूर्वक निकालकर एक कलश में उस राजा ने स्थापित किया। वहाँ सौ पुत्रों के पिता 'गृत्समद' नामक एक ब्राह्मण था ॥ १९ ॥

(उसकी) पत्नी ने पुत्री के लिए उससे प्रार्थना की। 'लक्ष्मी मेरी पुत्री हो' ऐसी इच्छा से वह मुनि कलश में ॥ २० ॥

प्रतिदिन नियत होकर मंत्रोच्चार-सहित कुशाग्र से दूध डालता था। एक दिन वह वन में गया था ॥ २१ ॥

दैवयोग से उसी दिन रावण ने उसी कलश में मुनियों का रुधिर रखा और (कलश) लेकर अपने घर चला गया ॥ २२ ॥

(अपनी) पत्नी मंदोदरी से उसने कहा— "हे सुन्दरि ! इस कलश की (सु-) रक्षा करो। (इस) कलश में स्थित रुधिर को विष से भी अधिक तीक्ष्ण (समझना) ॥ २३ ॥

मुनियों का यह शोणित किसी को देना भी नहीं चाहिए, (और) उसका भक्षण भी नहीं करना चाहिए।" त्रिलोक के जय के लोभ से लोगों को सतानेवाला रावण ॥ २४ ॥

देव, दानव, यक्ष तथा गंधर्वों की कन्यायों का हरण करके 'मंदर' तथा 'सह्य' पर्वत पर रमण करने लगा ॥ २५

हिमवन्मेरुविंध्याद्रौ रमणीयवने तथा ।
मंदोदरी तथा दृष्ट्वा पतिं सा हि मनस्विनी ॥ २६ ॥

आत्मानं गर्हयामास भर्तुः स्नेहमपश्यती ।
धिग्जीवितं हि नारीणां यौवनं कुलमेव च ॥ २७ ॥

वंचिताः पतिना याः स्युस्तस्मान्मे मरणं वरम् ।
पुरा रावणसंदिष्टं शोणितं क्ष्वेडतोऽधिकम् ॥ २८ ॥

पपौ मरणमांकांक्ष्य पतिना वंचिता सती ।
लक्ष्मीशरणदुग्धेन मिश्रिताच्छोणितादभूत् ॥ २९ ॥

सद्यो रावणकांताया गर्भो ज्वलनसन्निभः ।
ततो विस्मयमापन्ना सा हि मंदोदरी शुभाः ॥ ३० ॥

पीतं विषाधिकं रक्तं गर्भस्तेनाभवन्मम ।
इति संचिंतयामास भर्ता विप्रोषितो मम ॥ ३१ ॥

कामिनीभिः क्रीडते स कामी भर्ता हि रावणः ।
संवत्सरमिमं भर्त्रा सह मे वसतिर्नहि ॥ ३२ ॥

किं वक्तव्यं मया साध्व्या गर्भिण्या भर्तृसंसदि ।
चिंतया दग्धगात्रीव तीर्थसेवनछद्मना ॥ ३३ ॥

विमानवरमारुह्य कुरुक्षेत्रं जगाम सा ।
तत्र गर्भं विनिष्कृष्य निचखान भुवस्तले ॥ ३४ ॥

स्नात्वा सरस्वतीतोये पुनरागात्स्वमालयम् ।
न चोदितं तत्कस्मैचिद्रहः कार्यं सुगोपितम् ॥ ३५ ॥

कालेन कियता ब्रह्मञ्जनकर्षिर्महामनाः ।
कुरुक्षेत्रं समासाद्य जांगले यज्ञमावहन् ॥ ३६ ॥

स्वर्णलांगलमादाय यज्ञभूमिं चखान सः ।
स्वर्णलांगलसीतांतः कन्यका प्रोत्थिताभवत् ॥ ३७ ॥

पुष्पवृष्टिश्च महती पपात कन्यकोपरि ।
तद्दृष्ट्वा महदाश्चर्यं राजा विस्मयमागतः ॥ ३८ ॥

कर्तव्ये मूढतामाप ततः खेऽभूत्सरस्वती ।
राजन्गृहाण कन्यां त्वं पालयैनां महाप्रभाम् ॥ ३९ ॥

हिमालय, मेरु, विन्ध्याचल तथा रमणीय वन में (वह विहार करने लगा। तब) पति को इस प्रकार देखकर मनस्विनी मंदोदरी ॥ २६ ॥

पति का अपने ऊपर स्नेह न देखकर स्वयं को तिरस्कृत करने लगी— "उन नारियों के जीवन को, यौवन को एवं कुल को धिक्कार हो ॥ २७ ॥

"जो पति से वंचित होती हैं। अतः मेरे लिए मरण ही अच्छा है। पहले रावण ने कहा था कि यह रुधिर विष से भी अधिक (तीक्ष्ण) है" ॥ २८ ॥

पति से वंचित होकर मरण की इच्छा करके सती ने (उस रुधिर का) पान कर लिया। लक्ष्मी के आश्रयभूत दूध से मिश्रित उस शोणित से ॥ २९ ॥

शीघ्र ही रावण की पत्नी के उदर में अग्नि के समान तेजस्वी गर्भ (का आधान) हो गया। तब विस्मयपूर्ण होकर उस शुभ मंदोदरी ने ॥ ३० ॥

सोचा— "विष से भी अधिक (तीक्ष्ण) रक्त मैंने पी लिया है। इससे मुझमें गर्भ की धारणा हो गई है। मेरे पति (भी इस समय) मुझ से दूर हैं ॥ ३१ ॥

(मेरे) कामी पति रावण कामिनियों के साथ क्रीड़ा करते (रहते) हैं। एक साल हो गया, मैं पति का सहवास नहीं कर पाई हूँ ॥ ३२ ॥

पति के सामने साध्वी गर्भवती मैं क्या कहूँगी ? (इस प्रकार की) चिंता से दग्ध अंगोंवाली वह तीर्थ-सेवन के बहाने श्रेष्ठ विमान पर चढ़कर कुरुक्षेत्र गई। वहाँ गर्भपात करके (उस भ्रूण को) पृथ्वी में गाड़ दिया ॥ ३३-३४ ॥

सरस्वती के जल में स्नान करके वह पुनः अपने घर लौटी। यह गुप्त रहस्यमय कार्य उसने किसी को भी बताया नहीं ॥ ३५ ॥

हे ब्रह्मन् ! कुछ समय के बाद महात्मा जनक ने कुरुक्षेत्र में आकर कुरुजांगल में यज्ञ किया ॥ ३६ ॥

और सोने का हल लेकर यज्ञभूमि खोदी। सुवर्ण के हल की नोक से खोदने पर ज़मीन में से एक कन्या का प्रादुर्भाव हुआ ॥ ३७ ॥

तथा कन्या के ऊपर फूलों की बड़ी भारी वर्षा हुई। उस महान आश्चर्य को देखकर राजा आश्चर्यचकित हुए ॥ ३८ ॥

(और) किंकर्तव्यविमूढ़ हो गये। तब आकाशवाणी हुई— "हे राजन् ! इस महाप्रभावशालिनी कन्या को अपनाओ (और) इसका तुम पालन करो ॥ ३९ ॥

ज्वलनार्कसमां दिव्यां महत्कार्यं तवालये ।
भविष्यति महाभाग क्षेमं च जगतोऽनया ।। ४० ।।
यज्ञ संपाद्यतां राजन्नायं विघ्नस्तवानघ ।
नामास्याः किल सीतेति सीताया उत्थिता यतः ।। ४१ ।।
कल्पयैनां दुहितरमित्युक्त्वावाक् तिरोहिता ।
तच्छ्रुत्वा प्रीतिमान्राजा यज्ञं कृत्वा महाधनम् ।। ४२ ।।
जगाम सीतामादाय महिषीभ्यश्च तां ददौ ।।
एतत्ते कथितं विप्र सीताजन्मैककारणम् ।
श्रुत्वैतत्सर्वपापेभ्यो मुक्तो भवति मानवः ।। ४३ ।।
जनकदुहितृजन्म श्रावयित्वा तु श्रुत्वा
न पुनरिह हि जन्म प्राप्नुयात्पुण्यवांश्च ।
दशरथसुतकांता तस्य गेहं कदाचित्
विसृजति नहि सर्वैः पातकैर्मुच्यते च ।। ४४ ।।

।। इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकाण्डे श्रीसीतोत्पत्तिर्नामाष्टमः सर्गः ।। ८ ।।

नवमः सर्गः

रामः सीतापरिणयं कृत्वा दशरथादिभिः ।
भ्रातृभिश्चापि सहितो भार्यया सह सीतया ।। १ ।।
अयोध्यां गन्तुमारेभे नानावाद्यपुरःसरम् ।
आर्चीकनंदनो रामो भार्गवो रेणुकासुतः ।। २ ।।
तस्य दाशरथेः श्रुत्वा रामस्याक्लिष्टकर्मणः ।
विवाहकौतुकं वीरः पथा तेन समागतम् ।। ३ ।।
धनुरादाय तद्दिव्यं क्षत्रियाणां निवर्हणम् ।
जिज्ञास्यमानो रामस्य वीर्यं दाशरथेस्तथा ।। ४ ।।
सतमभ्यागतं दृष्ट्वा उद्यतास्त्रमवस्थितम् ।
प्रहसन्निव विप्रेन्द्रं रामो वचनमब्रवीत् ।। ५ ।।

अग्नि और सूर्य के समान दिव्य इस (कन्या) का तुम्हारे घर में बड़ा कार्य होगा। यह महाभाग्यशालिनी होगी। इससे जगत का बड़ा कल्याण होगा ॥ ४० ॥

हे राजन्! यज्ञ संपादन करो। हे अनघ! यह तुम्हारे लिए विघ्न नहीं है। यह हल की नोक से उत्पन्न हुई है। इसलिए इसका नाम सीता होगा ॥ ४१ ॥

इसे अपनी कन्या मानो।" यह कहकर वाणी तिरोहित हो गई। यह सुनकर प्रसन्न होकर राजा ने बहुत धन से युक्त यज्ञ सम्पन्न किया ॥ ४२ ॥

(वे) सीता को लेकर गये, (तथा) उसे रानियों को दिया। हे विप्र! सीता के जन्म का यह कारण मैंने आपसे कहा। इसका श्रवण करके मनुष्य सर्वपापों से मुक्त हो जाता है ॥ ४३ ॥

जानकी के जन्म की कथा का श्रवण एवं कथन करनेवाला पुण्यशाली (मनुष्य) फिर से इस मृत्युलोक में जन्म ग्रहण नहीं करता। दशरथ के पुत्र की पत्नी (लक्ष्मी) उसके घर का कभी त्याग नहीं करती और वह सब पातकों से मुक्त हो जाता है ॥ ४४ ॥

॥ इति श्री वाल्मीकिविरचित रामायण के
अद्भुतोत्तरकाण्ड में सीतोत्पत्ति नाम
अष्टम सर्ग समाप्त ॥ ८ ॥

नवम सर्ग

परशुराम द्वारा राम के विश्वरूप का दर्शन

सीता के साथ विवाह करके राम दशरथ, भ्राताओं एवं पत्नी सीता के साथ ॥ १ ॥

विविध प्रकार के वाद्यों-सहित अयोध्या जाने लगे। आर्चिकनंदन रेणुका के पुत्र भार्गव परशुराम ॥ २ ॥

दशरथ-पुत्र, महापराक्रमी उस राम के विवाह-कौतुक को सुनकर मार्ग में (वह वीर) उनसे मिले ॥ ३ ॥

क्षत्रियों का नाश करनेवाले उस दिव्य धनुष को लेकर दशरथ-पुत्र राम के बल को जानने की इच्छावाले वे (वहाँ आये) ॥ ४ ॥

उनको आये हुए (तथा) अस्त्र उठाये खड़े देखकर राम हँसते हुए उन विप्रेन्द्र से बोले ॥ ५ ॥

स्वागतं ते मुनिश्रेष्ठ किं कार्यं करवाणि ते।
प्रोवाच भार्गवो वाक्यं स्वागतेन किमस्ति मे ॥ ६ ॥

क्षत्रकालं हि राजेन्द्र धनुरेतन्ममास्ति हि।
समारोपय यत्नेन यदि शक्तोसि राघव ॥ ७ ॥

इत्युक्तस्त्वाह भगवंस्त्वं नाधिक्षेप्तुमर्हसि।
नहि नह्यधर्मो धर्मः क्षत्रियाणां द्विजातिषु ॥ ८ ॥

इक्ष्वाकूणां विशेषेण बाहुवीर्येण कत्थनम्।
तमेवं वादिनं तत्र रामो वचनमब्रवीत् ॥ ९ ॥

अलं वागुपदेशेन धनुरायच्छ राघव।
ततो जग्राह रोषेण क्षत्रियर्षभसूदनम् ॥ १० ॥

रामो दाशरथिर्दिव्यं हस्ताद्रामस्य कार्मुकम्।
धनुरारोपयामास सलीलमिव राघवः ॥ ११ ॥

ज्याशब्दमकरोत्तत्र स्मयमानः स वीर्यवान्।
तस्य शब्देन भूतानि विव्रेसुरशनेरिव ॥ १२ ॥

अथाब्रवीद्वचो रामं रामोदाशरथिस्तदा।
इदमारोपितं ब्रह्मन्किमन्यत्करवाणि ते ॥ १३ ॥

तस्य रामो ददौ दिव्यं जामदग्न्यो महाबलः।
शरमाकर्णदेशांतमयमाकृष्यतामिति ॥ १४ ॥

एतच्छ्रुत्वाब्रवीद्रामः प्रदीप्त इव मन्युना।
श्रूयते क्षम्यते चैव दर्पपूर्णोऽसि भार्गव ॥ १५ ॥

त्वया ह्यधिगतं तेजः क्षत्रियेभ्यो विशेषतः।
पितामहप्रसादेन तेन मां क्षिपसि ध्रुवम् ॥ १६ ॥

पश्य मां स्वेन रूपेण चक्षुस्ते वितराम्यहम्।
इत्युक्त्वा प्रददौ तस्मै रामो दिव्यां दृशं तदा ॥ १७ ॥

ततो रामशरीरे वै रामोऽपश्यत्स भार्गवः।
आदित्यान्सवसून्रुद्रान्साध्यांश्च समरुद्गणान् ॥ १८ ॥

पितॄन्हुताशनांश्चैव नक्षत्राणि ग्रहांस्तथा।
गन्धर्वान्राक्षसान्यक्षान्नदीस्तीर्थानि यानि वै ॥ १९ ॥

हे मुनिश्रेष्ठ ! आपका स्वागत हो ! मैं आपका कौन-सा कार्य करूँ ? तब भार्गव ने कहा— "स्वागत से मुझे क्या (प्रयोजन) ? ॥ ६ ॥

हे राजेन्द्र ! मेरा वह धनुष क्षत्रियों का काल है । यदि समर्थ हो तो आप प्रयत्न से इसे चढ़ा दीजिए" ॥ ७ ॥

ऐसा कहने पर (राम) बोले— "हे भगवान् ! आप हम पर आक्षेप करें यह उचित नहीं है । क्षत्रियों का ब्राह्मणों के प्रति (बल प्रकाशित करना) धर्म नहीं (है), अधर्म है ॥ ८ ॥

खास करके इक्ष्वाकुओं के लिए बाहुवीर्य का कथन करना (उचित नहीं है) ।" इस प्रकार बोलते हुए राम से परशुराम कहने लगे— ॥ ९ ॥

"वाणी का उपदेश करना बन्द करो । राघव, धनुष उठाओ !" तब क्रोध से (राम ने) क्षत्रियश्रेष्ठों का नाश करनेवाला (धनुष) हाथ में लिया ॥ १० ॥

दशरथ-पुत्र राम ने परशुराम के हाथ से उस दिव्य धनुष को उठाया, (और) राघव ने लीलापूर्वक धनुष चढ़ा दिया ॥ ११ ॥

हँसते हुए उस वीर ने धनुष की डोरी की टंकार की । वज्र (की ध्वनि के) समान उसके गंभीर घोष को सुनकर सब प्राणी घबरा गये ॥ १२ ॥

तब दशरथ-पुत्र राम परशुराम से कहने लगे— "हे ब्रह्मन् ! यह धनुष चढ़ा लिया । दूसरा आपके लिए क्या (कार्य) करूँ ?" ॥ १३ ॥

महाबली जमदग्निपुत्र परशुराम ने उन्हें एक दिव्य बाण दिया (और कहा)— "धनुष पर चढ़ा के कान तक खींचो" ॥ १४ ॥

यह सुनकर गुस्से से मानो प्रदीप्त होकर राम बोले— "सुना जाता है, क्षमा किया जाता है; परंतु आप तो अभिमान से पूर्ण हैं ॥ १५ ॥

पितामह के प्रसाद से आपने विशेषकर क्षत्रियों से तेज प्राप्त किया है । और इसी कारण निश्चित आप मुझ पर आक्षेप कर रहे हैं ॥ १६ ॥

आप असली रूप में मेरा दर्शन कीजिए । मैं आपको (दिव्य) चक्षु प्रदान करता हूँ ।" ऐसा कहकर राम ने उनको दिव्य दृष्टि दी ॥ १७ ॥

तब भार्गव परशुराम ने राम के शरीर में वसुओं-सहित आदित्य, रुद्र, साध्य तथा मरुतों के गण को देखा ॥ १८ ॥

पितृ, अग्नि, नक्षत्र, ग्रह तथा गंधर्व, राक्षस, यक्ष, नदी, तीर्थ, ॥ १९ ॥

ऋषीन्वै निखिलान्यांश्च ब्रह्मभूतान्सनातनान् ।
देवर्षींश्चैव कात्स्न्र्येन समुद्रान्पर्वतांस्तथा ॥ २० ॥

वेदांश्च सोपनिषदान्वषट्कारान्सहाध्वरैः ।
ऋचो यजूंषि सामानि धनुर्वेदांश्च सर्वशः ॥ २१ ॥

विद्युतो मेघवृन्दानि वर्षाणि च महाव्रत ।
ततः स भगवान्विष्णुस्तं वै बाणं मुमोच ह ॥ २२ ॥

शुष्काशनिसमाकीर्णं महोल्काभिश्च सुव्रतः ।
पांसुवर्षेण महता मेघसंघैश्च केवलम् ॥ २३ ॥

भूमिकंपैः सनिर्घातैर्नादैश्च विपुलैरपि ।
भार्गवं विह्वलं कृत्वा तेजश्चाक्षिप्य केवलम् ॥ २४ ॥

अगच्छज्ज्वलितो रामं शरो बाहुप्रचोदितः ।
स तु विह्वलतां गत्वा प्रतिलभ्य च चेतनाम् ॥ २५ ॥

रामः प्रत्यागतप्राणः प्राणमद्विष्णुतेजसम् ।
विष्णुना सोऽभ्यनुज्ञातो महेन्द्रमगमत्पुनः ॥ २६ ॥

भीतश्च तत्र न्यवसद्विनीतश्च महातपाः ।
ततः संवत्सरेऽतीते हृतौजसमवस्थितम् ॥ २७ ॥

निर्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन् ।
न वै सम्यगिदं पुत्र विष्णुमासाद्य वै कृतम् ॥ २८ ॥

स हि पूज्यश्च मान्यश्च त्रिषु लोकेषु सर्वदा ।
गच्छ पुत्र नदीं पुण्यां वधूसरकृतालयाम् ॥ २९ ॥

तत्रोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि ।
दीप्तोदं नाम तत्तीर्थं यत्र ते प्रपितामहः ॥ ३० ॥

भृगुर्देवयुगे राम तप्तवानुत्तमं तपः ।
तत्तथा कृतवान्रामो भार्गवो वचनान्पितुः ॥ ३१ ॥

प्राप्तवांश्च पुनस्तेजो भरद्वाज महामुने ।
एतद्यः शृणुयाद्वत्स रामचारित्रमुत्तमम् ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ३२ ॥

सर्व ऋषि, ब्रह्मभूत सनातन लोक, सारे देवर्षि, समुद्र, पर्वत, ॥ २० ॥

उपनिषद्-सहित वेद, यज्ञ-सहित वषट्कार, ऋचाएँ, यजुर्मंत्र, साममंत्र तथा धनुर्वेद सर्वत्र (देखने लगे) ॥ २१ ॥

विद्युत्, मेघवृन्द तथा वर्ष (आदि देखा), तब भगवान विष्णु ने उस बाण को छोड़ा ॥ २२ ॥

उस समय सारा जगत 'हे सुव्रत ! शुष्क वज्र से महा उल्का से, धूल की भारी वर्षा से तथा मेघ के समूहों से ॥ २३ ॥

निर्घात-सहित भूकम्प से, विपुल नाद से (व्याप्त हो गया)। (तथा) भार्गव को विह्वल करके उनके केवल तेज का आकर्षण कर के ॥ २४ ॥

(राम के) बाहु से छूटा हुआ बाण प्रज्वलित होता हुआ परशुराम (के प्रति गया। वे) विह्वल हो गये। (तथा) पुनः चेतना प्राप्त करके ॥ २५ ॥

प्राण पुनः प्राप्त करके परशुराम ने तेजस्वी विष्णु (को) प्रणाम किया। विष्णु की आज्ञा से वे फिर (से) महेन्द्र पर्वत की ओर चले गये ॥ २६ ॥

महा तपस्वी परशुराम (वहाँ) भयभीत एवं विनम्र होकर रहने लगे। इस प्रकार एक वर्ष बीत गया। अब वे पराक्रमरहित, निस्तेज होकर वहीं रह गये ॥ २७ ॥

तब मदरहित और दुःखी परशुराम को देखकर पितरों ने उनसे कहा— "हे पुत्र ! विष्णु को प्राप्त करके तुमने यह अच्छा नहीं किया ॥ २८ ॥

वह सदा तीनों लोकों में पूज्य और मान्य हैं। हे पुत्र ! वधूसर आलयवाली पवित्र नदी में जाओ ॥ २९ ॥

वहाँ तीर्थ में स्नान करके तुम फिर से अपना असली शरीर प्राप्त करोगे। वह दीप्तोद नामक तीर्थ है, जहाँ तुम्हारे प्रपितामह ॥ ३० ॥

भृगु ने देवयुग में, हे राम ! उत्तम तप किया था।" तब पिता के वचन से भार्गव परशुराम ने वैसा ही किया ॥ ३१ ॥

हे महामुने भरद्वाज ! (उन्होंने) पुनः (अपना खोया हुआ) तेज प्राप्त किया। हे वत्स ! इस उत्तम रामचरित को जो सुनता है, वह सारे पापों से मुक्त होकर विष्णुलोक को जाता है ॥ ३२ ॥

ततो रामो जानकीस्पृष्टपाणिः
सूतैर्भक्त्या मागधैः स्तूयमानः ।
पुष्पासारैरास्तृतो देवसंघैः
स उत्तरान्कोसलानाजगाम ॥ ३३ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अद्भुतोत्तरकाण्डे जामदग्न्याय विश्वरूपदर्शनं
नाम नवमः सर्गः ॥ ९ ॥

दशमः सर्गः

अथ सीतालक्ष्मणाभ्यां सह केनापि हेतुना ।
जगाम विपिनं रामो दंडकारण्यमाश्रितः ॥ १ ॥
तत्र गोदावरीतीरे पर्णशालां विधाय सः ।
उवास कंचित्कालं वै मृगयामभिकारयन् ॥ २ ॥
कदाचिद्रावणो मोहाल्लंकायां तां न्यवासयत् ।
तामदृष्ट्वा ततो रामो लक्ष्मणश्च महाबलः ॥ ३ ॥
आटतुश्चाटवीं सर्वां सीतादर्शनलालसौ ।
रामस्य रुदतस्तस्य बाष्पवारिसमुद्भवा ॥ ४ ॥
नदी वैतरणी चाभूच्चक्षुषोरश्रुषूद्भवा ।
वितरत्यश्रु वै यस्मादतो वैतरणी स्मृता ॥ ५ ॥
पितॄणां तरणं यस्मान्मातॄणां स्नानतर्पणात् ।
तेनापि कारणेनासौ नदी वैतरणी स्मृता ॥ ६ ॥
नेत्रयोर्दूषिकायाश्च ताभिः शैलास्ततोऽभवन् ।
सुग्रीवेण वानरेण सख्यं कर्तुं महामनाः ॥ ७ ॥
ऋष्यमूकमगाद्रामो लक्ष्मणेनानुजेन च ।
पञ्चभिर्मंत्रिभिः सार्द्धं सुग्रीवो नाम वानरः ॥ ८ ॥
यत्रास्ते वालिभयतः सोऽपश्यद्रामलक्ष्मणौ ।
चापबाणधरौ वीरौ ग्रसंताविव चाम्बरम् ॥ ९ ॥
तौ दृष्ट्वा सुमहत्त्रस्तो वालिपक्षावमन्यत ।
प्रास्थापयद्धनूमंतं भिक्षुरूपेण वानरम् ॥ १० ॥

(तब) जानकी का हाथ पकड़कर, सूत और बंदीजनों से भक्तिपूर्वक स्तुति किये जानेवाले देवताओं के संघों से पुष्पों की वर्षा से आच्छादित हो (कर) राम उत्तर कोसल की ओर गये ॥ ३३ ॥

॥ इति श्री वाल्मीकिविरचित आदिकाव्य रामायण के अद्भुतोत्तर-
काण्ड में परशुराम द्वारा राम के विश्वरूप का
दर्शन नाम नवम सर्ग समाप्त ॥ ९ ॥

दशम सर्ग

श्रीराम द्वारा हनुमान को (अपने) चतुर्भुज-रूप का दर्शन कराना

तदनन्तर सीता और लक्ष्मण के साथ किसी कारणवश राम वन में गये (तथा) दण्डकारण्य में आश्रय लिया ॥ १ ॥

वहाँ गोदावरी के किनारे पर्णशाला बनाकर कुछ समय तक मृगया करते हुए उन्होंने निवास किया ॥ २ ॥

एक बार मोहवश रावण ने उन (सीता) को लंका में वास कराया। उन (सीताजी) को न देखकर राम तथा महाबलवान लक्ष्मण ॥ ३ ॥

सीता के दर्शन की इच्छा से सारे वन में घूमने लगे। रोते हुए राम के (अश्रु-जल से उत्पन्न) ॥ ४ ॥

नेत्रों के अश्रुजल से वैतरणी नदी उत्पन्न हुई। (वह) अश्रु का वितरण करती थी, इसलिए वैतरणी कहलायी ॥ ५ ॥

जिस नदी में स्नान-तर्पण करने से पितरों का तर्पण होता है, उस कारण से उसे वैतरणी नदी कहा गया ॥ ६ ॥

नेत्रों के मल से वहाँ पर्वत हो गये। (तदनन्तर) वानर सुग्रीव से मित्रता करने के लिए वे महामना ॥ ७ ॥

राम छोटे भाई लक्ष्मण-सहित ऋष्यमूक (पर्वत) की ओर गये। पाँच मंत्रियों के साथ सुग्रीव नामक वानर ॥ ८ ॥

बालि के भय से वहाँ रह रहा था। उस सुग्रीव ने राम-लक्ष्मण को देखा। चाप और बाण धारण किये हुए वे वीर मानो आकाश को ग्रसित करते थे ॥ ९ ॥

उन्हें देखकर सुग्रीव अत्यन्त भयग्रस्त हुए। (कारण) वह उन्हें बालि के पक्ष का मानता था। (उन्होंने) भिक्षुक के रूप में वानर हनुमान को (वहाँ) भेजा ॥ १० ॥

आत्मानं दर्शयामास हनूमान्रामलक्ष्मणौ ।
को भवानिति चोक्तेऽथ चतुर्बाहुं किरीटिनम् ॥ ११ ॥
शंखचक्रगदापाणिं वनमालाविभूषितम् ।
श्रीवत्सवक्षसं देवं पीतवाससमच्युतम् ॥ १२ ॥
लक्ष्मीसरस्वतीभ्यां च संश्रितोभयपार्श्वकम् ।
ब्रह्मपुत्रैः सनंदाद्यैः स्तूयमानं समन्ततः ॥ १३ ॥
देवर्षिपितृगंधर्वैः सिद्धविद्याधरोरगैः ।
सेव्यमानं महात्मानं पुंडरीकविलोचनम् ॥ १४ ॥
सहस्रसूर्यसंकाशं शतचन्द्रशुभाननम् ।
फणासहस्रमतुलं धारयन्तं च लक्ष्मणम् ॥ १५ ॥
अनन्तं रामशिरसि आतपत्रं फणागणैः ।
दधानं सर्वलोकेशनागसंघैश्च संस्तुतम् ॥ १६ ॥
आत्मानं दर्शयामास रामचन्द्रो हनूमते ।
तद्रूपं हनुमान्वीक्ष्य किमेतदिति विस्मितः ॥ १७ ॥
क्षणं निमील्य नयने पुनः सोऽपश्यदद्भुतम् ।
स्तुत्वा नत्वा च बहुधा सोऽब्रवीद्राघवं वचः ॥ १८ ॥
अहं सुग्रीवसचिवो हनुमान्नाम वानरः ।
सुग्रीवेण प्रेषितोऽहं युवां कौ ज्ञातुमागतः ॥ १९ ॥
दृष्ट्वा युवां च द्विभुजौ चापबाणधरौ परम् ।
आगत्य चान्यथा दृष्टं वद मे को भवानिति ॥ २० ॥
इति पवनसुतं ते व्याकुलं व्याहरन्तं
किमिति कथमितीदं कंपमानं प्लवंगम् ।
कृतकरपुटमौलिं संविधेयं ब्रुवन्तं
मधुरतरमुदारं रामचन्द्रोऽब्रवीत्तम् ॥ २१ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अद्भुतोत्तरकाण्डे श्रीरामचतुर्भुजरूपदर्शनं
नाम दशमः सर्गः ॥ १० ॥

हनुमान ने राम-लक्ष्मण को अपना (रूप) दिखाया। 'आप कौन हैं ?' ऐसा पूछने पर चतुर्बाहु किरीटधारी ॥ ११ ॥

हाथ में शंख, चक्र तथा गदा धारण किये हुए, वनमाला से विभूषित, वक्षःस्थल में श्रीवत्स धारण किये हुए, पीताम्बरधारी देव अच्युत को ॥ १२ ॥

दोनों बाजू से लक्ष्मी और सरस्वती से सेवित, चारों ओर सनंदादि ब्रह्मा के पुत्रों से स्तुति किए जानेवाले, देव, ऋषि, पितृ, गंधर्व, सिद्ध, विद्याधर (तथा) सर्पों से सेवित, कमललोचन, हज़ारों सूर्य के समान (प्रकाशमान), सौ चन्द्र के समान सुन्दर मुखवाले हैं (तथा) हज़ार फन धारण किये हुए लक्ष्मण को ॥ १३-१५ ॥

जो अनन्त हैं (तथा) राम के सिर पर फनों के समूह से छत्र धारण करनेवाले, सर्व लोकपाल तथा नागसमूहों से स्तुति किये जानेवाले हैं ॥ १६ ॥

(इस प्रकार) रामचन्द्र ने अपना (विराट् परमात्म-स्वरूप) हनुमान को दिखाया। इस रूप को देखकर हनुमान "यह क्या है ?" —ऐसे विस्मित हुए ॥ १७ ॥

क्षण भर आँखें मूँदकर वे फिर से उस अद्भुत (रूप को) देखते थे। अनेक बार स्तुति और प्रणाम करके वे राघव से (वचन) कहने लगे— ॥ १८ ॥

"मैं सुग्रीव का सचिव हनुमान नाम का वानर हूँ। सुग्रीव द्वारा भेजा हुआ मैं, आप दोनों कौन हैं, यह जानने आया हूँ ॥ १९ ॥

आप दोनों को दो भुजावाले तथा धनुष-बाण धारण किये हुए देखकर (मैं आया), किन्तु आने पर कुछ और ही देखा। मुझसे कहिए, आप दोनों कौन हैं ?" ॥ २० ॥

इस प्रकार व्याकुलता से 'यह क्या है', 'कैसे हैं', ऐसा बोलते हुए, कंपित होते हुए, हाथ जोड़कर, सर झुकाकर मधुर वचन से बोलते हुए उदार पवन-पुत्र उस वानर से रामचन्द्रजी ने कहा ॥ २१ ॥

॥ इति श्रीवाल्मीकिविरचित आदिकाव्य रामायण के अद्भुतोत्तर-
काण्ड में हनुमान द्वारा राम के चतुर्भुजरूप का दर्शन नामक
दशम सर्ग समाप्त ॥ १० ॥

एकादशः सर्गः

रामः प्राह हनूमन्तमात्मानं पुरुषोत्तमः ।
वत्स वत्स हनूमंस्त्वं भक्तोयत्पृष्टवानसि ॥ १ ॥
तत्तेऽहं संप्रवक्ष्यामि शृणुष्वावहितो मम ।
अवाच्यमेतद्विज्ञानमात्मगुह्यं सनातनम् ॥ २ ॥
यन्न देवा विजानंति यतन्तोऽपि द्विजातयः ।
इदं ज्ञानं समाश्रित्य ब्रह्मभूता द्विजोत्तमाः ॥ ३ ॥
न संसारं प्रपश्यंति पूर्वेऽपि ब्रह्मवादिनः ।
गुह्याद्गुह्यतमं साक्षाद्गोपनीयं प्रयत्नतः ॥ ४ ॥
वंशे भक्तिमतो ह्यस्य भवंति ब्रह्मवादिनः ।
आत्मा यः केवलः स्वच्छः शांतः सूक्ष्मः सनातनः ॥ ५ ॥
अस्ति सर्वान्तरः साक्षाच्चिन्मात्रस्तमसः परः ।
सोऽन्तर्यामी स पुरुषः स प्राणः स महेश्वरः ॥ ६ ॥
स कालाग्निस्तदव्यक्तं सद्यो वेदयति श्रुतिः ।
कस्माद्विजायते विश्वमत्रैव प्रविलीयते ॥ ७ ॥
मायावी मायया बद्धः करोति विविधास्तनूः ।
न चाप्ययं संसरति न च संसारयेत्प्रभुः ॥ ८ ॥
नायं पृथ्वी न सलिलं न तेजः पवनो नभः ।
न प्राणो न मनो व्यक्तं न शब्दः स्पर्श एव च ॥ ९ ॥
न रूपरसगन्धाश्च नाहङ्कर्ता न वागपि ।
न पाणिपादौ नो पायुर्न चोपस्थं प्लवंगम ॥ १० ॥
न कर्ता न च भोक्ता च न च प्रकृतिपूरुषौ ।
न माया नैव च प्राणश्चैतन्यं परमार्थतः ॥ ११ ॥
तथा प्रकाशतमसोः सम्बन्धो नोपपद्यते ।
तद्वदेव न संबन्धः प्रपञ्चपरमात्मनोः ॥ १२ ॥
छायातरू यथा लोके परस्परविलक्षणौ ।
तद्वत्प्रपंचपुरुषौ विभिन्नौ परमार्थतः ॥ १३ ॥
यद्यात्मा मलिनोऽस्वस्थो विकारी स्यात्स्वभावतः ।
नहि तस्य भवेन्मुक्तिर्जन्मांतरशतैरपि ॥ १४ ॥

एकादश सर्ग

श्रीराम द्वारा सांख्य-योग कहना

पुरुषोत्तम श्रीराम ने अपने बारे में हनुमान से कहा— हे वत्स हनुमान ! हमारे भक्त ! तुम जो हमसे पूछते हो ॥ १ ॥

(उस विषय में) मैं बताता हूँ। तुम सावधान होकर मुझे सुनो। यह आत्मगुह्य सनातन विज्ञान किसी से कहना नहीं चाहिए ॥ २ ॥

जिसको देवता भी नहीं जानते और प्रयत्न करने पर भी द्विजाति (ब्राह्मण, क्षत्रिय और वैश्य) भी (नहीं जानते) इस ज्ञान के आधार पर श्रेष्ठ ब्राह्मण लोग ब्रह्ममय हो गये हैं ॥ ३ ॥

प्राचीन ब्रह्मवादी भी (इसके कारण) संसार को नहीं देखते हैं, यह गुह्य से भी गुह्य है एवं प्रयत्नपूर्वक छिपा के रखने योग्य है ॥ ४ ॥

(जो इसे जानता है) उसके वंश में भक्तिमान् ब्रह्मवादी (उत्पन्न) होते हैं। आत्मा जो कि केवल, स्वच्छ, शांत, सूक्ष्म, सनातन है ॥ ५ ॥

वह सर्व के भीतर रहनेवाला साक्षात् चिन्मात्र (और) अंधकार से परे है, वही अन्तर्यामी है, वही पुरुष है, प्राण है और महेश्वर है ॥ ६ ॥

वेद कहते हैं कि वही कालाग्नि है और वही अव्यक्त है। उसी में से विश्व उत्पन्न होता है और इसी में लीन हो जाता है ॥ ७ ॥

वही मायावी माया से बद्ध होकर अनेक शरीर धारण करता है। न तो वह चलता है, न तो इसे चलाने में कोई समर्थ है ॥ ८ ॥

यह न पृथ्वी है न जल, न तेज न पवन, न आकाश न प्राण, न मन न अव्यक्त शब्द, न तो स्पर्श ॥ ९ ॥

यह रूप, रस और गन्ध (भी) नहीं है। न अहंकार है, न वाणी और हे वानर ! यह न तो हाथ-पैर है, न पायु (या) उपस्थ है ॥ १० ॥

कर्ता नहीं है, भोक्ता नहीं है; यह न तो प्रकृति है न पुरुष है; न माया है न प्राण ! परमार्थतः यह केवल चैतन्य-स्वरूप है ॥ ११ ॥

जैसे प्रकाश और अंधकार का संबंध नहीं हो सकता, वैसे ही प्रपंच और परमात्मा का संबंध नहीं हो सकता ॥ १२ ॥

जिस प्रकार जगत में छाया और वृक्ष परस्पर अलग हैं, इसी प्रकार प्रपंच और पुरुष परमार्थरूप से भिन्न हैं ॥ १३ ॥

यदि आत्मा मलिन, अस्वस्थ और स्वभाव से विकारी होती, तो सौ जन्मों में भी उसकी मुक्ति न हो सकती ॥ १४ ॥

पश्यंति मुनयो मुक्ताः स्वात्मानं परमार्थतः ।
विकारहीनं निर्दुःखमानंदात्मानमव्ययम् ॥ १५ ॥
अहं कर्ता सुखी दुःखी कृशः स्थूलेति या मतिः ।
साप्यहंकृतिसम्बंधादात्मन्यारोप्यते जनैः ॥ १६ ॥
वदंति वेदविद्वांसः साक्षिणं प्रकृतेः परम् ।
भोक्तारमक्षयं बुद्ध्वा सर्वत्र समवस्थितम् ॥ १७ ॥
तस्मादज्ञानमूलोयं संसारः सर्वदेहिनाम् ।
अज्ञानादन्यथा ज्ञातं तच्च प्रकृतिसङ्गतम् ॥ १८ ॥
नित्योदितः स्वयंज्योतिः सर्वगः पुरुषः परः ।
अहंकाराविवेकेन कर्ताहमिति मन्यते ॥ १९ ॥
पश्यंति ऋषयो व्यक्तं नित्यं सदसदात्मकम् ।
प्रधानं प्रकृतिं बुद्ध्वा कारणं ब्रह्मवादिनः ॥ २० ॥
तेनात्र सङ्गतो ह्यात्मा कूटस्थोऽपि निरंजनः ।
आत्मानक्षरं ब्रह्म नावबुद्धयंति तत्त्वतः ॥ २१ ॥
अनात्मन्यात्मविज्ञानं तस्माद्दुःखं तथेतरत् ।
रागद्वेषादयो दोषाः सर्वभ्रांतिनिबंधनाः ॥ २२ ॥
कार्ये ह्यस्य भवेदेषा पुण्यापुण्यमिति श्रुतिः ।
तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः ॥ २३ ॥
नित्यः सर्वत्रगो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकः स भिद्यते शक्त्या मायया न स्वभावतः ॥ २४ ॥
तस्मादद्वैतमेवाहुर्मुनयः परमार्थतः ।
भेदोऽव्यक्तस्वभावे न सा च मायात्मसंश्रया ॥ २५ ॥
यथाहि धूमसंपर्कान्नाकाशो मलिनो भवेत् ।
अंतःकरणजैर्भावैरात्मा तद्वन्नलिप्यते ॥ २६ ॥
यथा स्वप्रभया भाति केवलः स्फटिकोपलः ।
उपाधिहीनो विमलस्तथैवात्मा प्रकाशते ॥ २७ ॥
ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ।
अर्थस्वरूपमेवाज्ञाः पश्यंत्यन्ये कुबुद्धयः ॥ २८ ॥
कूटस्थो निर्गुणो व्यापी चैतन्यात्मा स्वभावतः ।
दृश्यते ह्यर्थरूपेण पुरुषैर्भ्रान्तदृष्टिभिः ॥ २९ ॥

मुक्त मुनिजन अपनी आत्मा को परमार्थतः विकारहीन, दुःखरहित, आनंदस्वरूप और अव्यय देखते हैं ॥ १५ ॥

मैं कर्ता हूँ, सुखी हूँ, दुःखी हूँ, कृश हूँ, स्थूल हूँ, ऐसी जो बुद्धि है, वह भी अहंकार के संबंध में लोग आत्मा में आरोपित करते हैं ॥ १६ ॥

वेद को जाननेवाले उसे जानकर उसको साक्षी, प्रकृति से परे, भोक्ता, अक्षय और सर्वत्र स्थित बताते हैं ॥ १७ ॥

अतः देहधारियों का यह संसार अज्ञान के कारण है। अज्ञान के कारण प्रकृति से युक्त उसको अन्यथा जाना जाता है ॥ १८ ॥

वह नित्य उदित, स्वयंज्योति, सर्वव्यापी और परमपुरुष है। अहंकार के अविवेक से मैं कर्ता हूँ, ऐसा माना जाता है ॥ १९ ॥

ऋषि लोग उस नित्य सद्-असदात्मक तत्त्व को स्पष्ट रूप से देखते हैं। ब्रह्मवादी उस प्रधान प्रकृति को कारण जानकर उससे (प्रकृति से) युक्त आत्मा कूटस्थ और निरंजन होते हुए भी अक्षर ब्रह्मरूप आत्मा को तात्त्विक रूप से नहीं जानते ॥ २०-२१ ॥

अनात्मा में आत्मा को जानकर दुःख तथा सुख होता है। राग-द्वेष आदि दोष भ्रांति के कारण हैं ॥ २२ ॥

इसके कार्य में ही पुण्य, अपुण्य होता है, ऐसी श्रुति है। इसी के वश से सब प्राणियों के देह की उत्पत्ति होती है ॥ २३ ॥

आत्मा नित्य, सर्वत्रगामी, कूटस्थ और दोषवर्जित है। एक ही वह स्वभाव से नहीं, किन्तु अपनी माया-शक्ति से भिन्न-भिन्न प्रकार की दिखाई देती है ॥ २४ ॥

इसलिए मुनिजन 'परमार्थ' से अद्वैत का ही तात्पर्य रखते हैं। अव्यक्त के स्वभाव में भेद नहीं है। वह माया के आधार से है ॥ २५ ॥

जिस प्रकार धूम के संपर्क से आकाश मलिन नहीं होता, उसी प्रकार अंतःकरण में उत्पन्न होनेवाले भावों से आत्मा लिप्त नहीं होती ॥ २६ ॥

जैसे स्फटिक का पत्थर केवल अपनी कान्ति से प्रकाशित होता है, वैसे ही उपाधिरहित निर्मल आत्मा प्रकाशित होती है ॥ २७ ॥

बुद्धिमान लोग इस जगत को ज्ञानस्वरूप ही बताते हैं। अन्य दुर्बुद्धि, अज्ञानी लोग इसे अर्थस्वरूप देखते हैं ॥ २८ ॥

यह आत्मा स्वभाव से कूटस्थ, निर्गुण, सर्वव्यापी और चैतन्यमय है। भ्रान्त दृष्टिवाले लोगों को यह अर्थरूप दिखती है ॥ २९ ॥